प्रकाशन प्रत्येक माह की 1 तारीख

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः २५/-
वार्षिक-शुल्कम्
२५०/-
पञ्चवार्षिकशुल्कम्
११००/-
पञ्चदशवार्षिकशुल्कम्
३१००/-

वर्षम् 75, अङ्कः -5, फाल्गुनमासः, विक्रमाब्दः 2081, युगाब्दः 5126, मार्च, 2025

माघ-विशेषाङ्कः



'माघ' काव्यस्य कर्ता यो दानवीरो महाकविः।
राजस्थाने जनिर्यस्य विशेषाङ्केण पूज्यते॥

# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | महाकविमाघसम्मतं काव्यलक्षणम् | प्रोफेसर रामकुमारशर्मा | ६ |
| ३ | माघस्य पाण्डित्यम् | डॉ. नाथूलालसुमनः | ९ |
| ४ | काव्येषु माघः | डॉ. अञ्जना शर्मा | १२ |
| ५ | महाकवेर्माघस्य काव्यशास्त्रीयं ज्ञानम् | डॉ० बाबूलालः मीना, डॉ० आशा सिंह रावत | १६ |
| ६ | सर्वे ममन्थुर्मुदा | प्रो.ताराशंकर शर्मा पाण्डेयः | २१ |
| ७ | पृथुवंशम् | कविसार्वभौम अभिराजराजेन्द्रमिश्रः | २३ |
| ८ | स्वतन्त्रतायास्तात्पर्यम् | डॉ. महेशचन्द्रशर्मा गौतमः | २७ |
| ९ | गगनविहारी | डॉ. सत्यव्रत वर्मा | ३० |
| १० | नेपालस्य अद्भुतं तीर्थस्थलं बूढानीलकण्ठः | शिवराजभट्टः | ३३ |
| ११ | कन्यकाजन्मव्यापारकष्टेन किम् ? | प्रीतिपुजाराः | ३५ |
| १२ | स्वास्थ्य-संरक्षणम् | डॉ. पवनकुमारशर्मा | ३६ |
| १३ | वेदस्य परिचयः | संजयशर्मा | ३७ |
| १४ | 'स्कायन्' इति प्रयोगस्य साधुत्वम् | ऐश्वर्या | ४० |
| १५ | देवर्षि-शास्त्री च कलाधरो वै भाषासु ... | सम्पादकः | ४२ |
| १६ | गुरुकलानाथं मुदा मन्महे | गौतमः पटेलः | ४२ |
| १७ | विद्वद्वरेण्यदेवर्षिकलानाथः | डॉ. रामनारायणझाः | ४३ |
| १८ | पुस्तकसमीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | ४६ |
| १९ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ४७ |
| २० | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ४९ |


लेखकेभ्यो निवेदनम् - कृपया स्वलेखान् 'चाणक्य Font' द्वारा टंकयित्वा अशुद्धिसंशोधनं च कृत्वा 'PDF' एवं 'Word' द्वारा प्रेषयन्तु।
ग्राहकेभ्यो निवेदनम् - किसी मास का अंक दिनाङ्क 10 तक प्राप्त न हुआ हो तो कृपया Whatsapp द्वारा चलदूरभाष सं. 93520 30291, 8005813613 ( व्यवस्थापक ) पर अपने नाम, पते सहित सूचना करें।

## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9799011085**

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

॥ श्रीश: ॥

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षका:
श्रीश्यामशरणदेवाचार्य:
( निम्बार्कपीठम्, सलेमाबाद: )
स्वामी रामभद्राचार्य:
( चित्रकूट: )
स्वामी अवधेशानन्दगिरि:
( हरिद्वारम् )
महन्त: गोविन्ददेवगिरि:
( पुणे )
श्रीमज्जगद्गुरुद्वाराचार्योऽग्रपीठाधीश्वरो मलूकपीठाधीश्वरश्च
स्वामी श्रीराजेन्द्रदासमहाराज:
( अग्रपीठम्, रेवासा )
महन्त: प्रतापपुरी
( तारातरामठम्, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

सम्पादक:
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादक:
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादक:
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्ष:
प्रोफेसर बनवारीलालगौड:

उपाध्यक्षौ
डॉ. नाथूलालसुमन:
डॉ. नन्दसिंहनरूका:

सचिव:
डॉ. सुधीरकुमारशर्मा

सहसचिव:
कृष्णाकुमारशर्मा

व्यवस्थापक:
राजीवदाधीच:
9352030291

केन्द्रीय संस्कृत विश्वविद्यालय ( शिक्षा मंत्रालय, भारत सरकार के अधीन ) के द्वारा संस्कृत पुस्तकों के प्रकाशनार्थ वित्तीय सहायता की योजना के तहत प्रदत्त वित्तीय सहायता से प्रकाशित।

कार्यालय:
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 75 अङ्क: -5
फाल्गुनमास:
विक्रमाब्द: 2081
युगाब्द: 5126
मार्च, 2025

एकस्या: प्रते: 25/-
वार्षिकशुल्कम् 250/-
पञ्चवार्षिकशुल्कम् 1100/-
आजीवनसदस्यताशुल्कम् 3100/- ( 15 वर्षाणि )

सम्पादकीयम्

# शिशुपालवधे माघः पाण्डित्यं भजतेतराम्

...✍ प्रोफेसर श्रीकृष्णशर्मा

राजस्थानप्रान्तस्येदं सौभाग्यं यदत्र जालौर-मण्डलान्तर्गतं 'भीनमाल' नगरं महाकविर्माघः सप्तमशताब्द्या उत्तरार्धे स्वजन्मनाऽलञ्चकार। संस्कृतमहाकाव्यस्योत्कर्षकाले जनिमवाप्य विंशतिसर्गनिबद्धेन 'शिशुपालवधम्' इति कृतिमात्रेणैव स्वकीयवैदुष्येण बृहत्त्रय्यां स महतीं प्रतिष्ठामवाप।

'**नवसर्ग**-गते माघे नवशब्दो न विद्यते'
'**मेघे** माघे गतं वयः'
'**बुभुक्षितै**र्व्याकरणं न भुज्यते
न पीयते काव्यरसः पिपासितैः।
न विद्यया केनचिदुद्धृतं कुलं
हिरण्यमेवार्जय निष्फलाः क्रियाः।।' इत्यादि-

माघकविविषयिणीभिरुक्तिभिः माघकाव्यानुशीलनेन च ज्ञायते यत्तस्य वर्णनानैपुण्यं धर्मशास्त्र-मन्त्रशास्त्र-गजाश्वशास्त्र-संगीतशास्त्र-नाट्यशास्त्र-काव्यशास्त्र-सांख्यन्यायादिदर्शनशास्त्र-आयुर्वेद-राजनीतिशास्त्रादिविषयकम् आसीद्, अतः स बहुश्रुतो विद्वान् पण्डितमण्डल्यां मन्यते, तथापि सर्वतः प्रागस्ति स महावैयाकरणः। अतः स '**पण्डितकविरि**'ति ख्यातिं जगाम। अतोऽत्र तस्य शब्दशास्त्रगतवैशिष्ट्यस्य दिग्दर्शनं प्रस्तूयते।

शिशुपालवध-महाकाव्यस्य द्वितीयसर्गे (2.12) वर्णितं यद् युधिष्ठिरस्य राजसूय-यज्ञे आगमनात् पूर्वं श्रीकृष्णो बलरामोद्धवाभ्यां सह मन्त्रणां कुर्वन् चिन्तयति यद् आततायिनं शिशुपालं कथं हन्याद्? द्रष्टव्यं व्याकरणप्रयोगैर्भावव्यंजनाया प्रस्तुति-करणम्-

**'न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति।
यत्तु दन्दह्यते लोकमदो दुःखाकरोति माम्।।'**

सत्वतोऽपत्यं स्त्री सात्वती कृष्णस्य पितृष्वसा। तस्या पुत्रश्चेदिराजा शिशुपालः। स मह्यमपराध्यतीत्यतो नाहं दूये=परितप्ये। किन्तु लोकं दन्दह्यते = गर्हितं यथा स्यादेवं दहतीत्याशयः। अतो लोकदहनं तस्य, मां दुःखाकरोति=दुःखमनुभावयतीत्याशयः।

अत्र 'दन्दह्यते' इति क्रियापदे गर्हाऽर्थे 'लुप-सद-चर-जप-जभ-दह-दश-गृभ्यो भावगर्हायाम्' (पा. 3.1.24) इति पाणिनिसूत्रेण कृञो योगे दुःखशब्दात् प्रातिलोम्ये गम्यमाने अन्तर्भावितण्यर्थे 'डाच्' प्रत्ययो जातः। स्वाम्यादेरनभिमतानुष्ठानेन अभिमताननुष्ठानेन वा चित्तस्य पीडितं (दुःखं) प्रातिलोम्यं भवति। अतो बन्धुरपि स चैद्यो न मर्षणीयः।

उपर्युक्तश्लोके 'दूये' 'दन्दह्यते' 'अदः' 'दुःखाकरोति' - एतानि पदानि ध्यातव्यानि।

शिशुपालो यद्यपि श्रीकृष्णस्य पैतृष्वसेयत्वात् सहजमित्रम्भवति, तथापि रुक्मिणीहरण-द्वारकापुर्या अवरोधन-यदुवंशस्त्रीणामपहरणादिविप्रकृत-घटनाभिः सोऽधुना कृत्रिमः शत्रुः सञ्जातः। अतो बलरामो जगाद - यद्येवं तिरस्कुर्वन् स उपेक्ष्येत तदा मनुष्यजन्म केवलं सञ्ज्ञार्थं मन्यते, न किमपि तस्य जन्मसार्थक्यम्- यथा गोत्वादिजात्या, पाचकत्वादिक्रियया तथा शुक्लत्वादिगुणैः कस्यचिद् व्यावहारिकार्थविशेषस्य सम्पादनं न क्रियते तदा केवलं संज्ञात्मको व्यक्तिर्व्यर्थ एव, तथैव ब्राह्मणत्वादिजात्या, इज्याध्ययनदानादिक्रियाभिः शौर्यादिगुणैश्च यदि पुण्यकीर्त्ति-पुरुषार्थादिप्रयोजनविशेषस्य

सम्पादनं नैव क्रियते तदा तस्य पुरुषस्य यदृच्छा शब्दवत् प्रादुर्भाव एव व्यर्थः। अर्थात् जात्यादि-प्रवृत्तिनिमित्तशून्य इच्छाप्रकल्पितो डित्थादि यदृच्छाशब्दः केवलं संकेतग्रहायैव प्रयुक्त इति मन्तुं शक्यते।

अत्रेदमाकूतम् यद् महाभाष्यकारः पतञ्जलिः 'ऋ लृक्' इति शिवसूत्रभाष्ये '**चतुष्टयी** शब्दानां प्रवृत्तिः – जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छा-शब्दाश्चतुर्थाः' इत्येवं ब्रुवन् शब्दानां चातुर्विध्यं प्रत्यपादयत्। परमन्ते तूपसंहरन् ब्रवीति – '**त्रयी** शब्दानां प्रवृत्तिः – जातिशब्दाः, गुणशब्दाः, क्रियाशब्दा इति, न सन्ति यदृच्छाशब्दाः' इति।

तदेवम् 'असम्पादयतः कंचिदर्थं' इत्याद्युक्त श्लोकेन महाकविना माघेन शब्दशास्त्रस्य सिद्धान्त एव सम्यक्तया प्रतिपादित इति ज्ञेयम्।

**निपातनवर्णनम्** – माघकाव्यस्यैकोनविंशसर्गे वर्णितमस्ति – यदा प्रद्युम्नसेना शिशुपालसेना च परस्परं युद्धाय प्रवर्तेते तदा समरांगणे अभिमुख-बन्धोरपि वध्यत्वात् सुहृत् – स्वामी-पितृव्य-भ्राता-मातुलप्रभृतय आत्मीयजना अपि निपातिताः = वीरशय्यां गमिताः। तदानीं तद् रणाङ्गणं धीराः पाणिनिना प्रोक्तं पाणिनीयम् अष्टाध्यायीव्याकरण-मिव दृष्टवन्तः। यथोक्तम् –

**'निपातितसुहृत्स्वामिपितृव्यभ्रातृमातुलम्।**
**पाणिनीयमिवालोकि धीरैस्तत् समराजिरम्।।'**

इति। – शिशुपालवधम्, 19.75

अयमाशयः। समरांगणे सुहृदादयो निपातिताः= वीरगतिं प्रापिता इत्युक्तपूर्वम्। व्याकरणे अष्टाध्याय्यां सुहृदादयः शब्दा लक्षणाभावे शब्दसाधुत्वाय सूत्रकृता सूत्रस्वरूपेणैवोच्चारिता अर्थात् निपातनात् साधिताः। तथा हि –

(क) **सुहृद्** – शोभनं हृदयं यस्य सः। 'सुहृद्-दुर्हृदौ मित्रामित्रयोः' (पा. 5.4.150) इत्यनेन हृदयस्य हृदादेशो निपातनाद्भवति।

(ख) **स्वामी** – स्वम् अस्यास्तीति स्वामी। अर्थात् नियन्ता। 'स्व' शब्दस्य चत्वारोऽर्थाः – आत्मा, आत्मीयः, ज्ञातिः धनञ्चेति। प्रकृते स्वामी आत्मार्थकः। अत्र 'स्वामिन्नैश्वर्ये' (पा. 5.4.126) इति सूत्रेण मत्वर्थीय 'आमिनच्' प्रत्ययो निपात्यते। धनार्थे तु 'स्ववान्' इति।

(ग) **पितृव्यः** – पितुर्भ्राता पितृव्यः। अत्र 'पितृव्य-मातुल-मातामह-पितामहाः' (पा. 4.2.36) इति सूत्रान्तर्वर्तिना 'पितुर्भ्रातरि व्यत्' इति वार्तिकेन निपातनात् सिद्धः।

**भ्राता** – बिभर्तीति भ्राता। भ्राजते = दीप्यतेऽसौ वा भ्राता। 'नप्तृ-नेष्टृ-त्वष्टृ-होतृ-पोतृ-भ्रातृ-जामातृ-मातृ-पितृ-दुहितृ' (उणादि 2.97) इत्यनेन निपातनात् 'तृच्' प्रत्ययेन निष्पन्नः।

**मातुलः** – मातुर्भ्राता। 'मातृ' शब्दात् 'पितृव्य-मातुले' त्याद्युक्त (पा. 4.2.36) सूत्रेण निपातनात् डुलचि, टिलोपे च निष्पन्नः।

दिङ्मात्रमेतत्। वस्तुतो माघकाव्ये पदे पदे व्याकरणस्य प्रौढ-पाण्डित्यमनुभूयते। एवमेव सकलशास्त्रेष्वपि ज्ञेयम्।

**– सम्पादकः**

जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालये

संस्कृतविभागाध्यक्षचरः,

जयपुरस्थ-जगद्गुरु-रामानन्दाचार्य- राजस्थान-

संस्कृत-विश्वविद्यालये व्याकरणपीठाध्यक्षचरश्च।

दूरभाषाङ्कः: 8386943655

# महाकविमाघसम्मतं काव्यलक्षणम्

❑ प्रोफेसर रामकुमारशर्मा

अलंकारशास्त्रे यत् काव्यस्य स्वरूपं लभ्यते तत्र सर्वत्र शब्दार्थयोः संनिवेशः साधारणः। किन्तु शब्दार्थयोर्विशेष्यविशेषणभावे विलोक्यते विशेषः। स त्रिधा वर्तते-शब्दस्य विशेष्यता, अर्थस्य विशेष्यता, शब्दार्थयोरुभयोर्विशेष्यता च। इष्टार्थव्यवच्छिन्ना पदावली काव्यम्, वाक्यं रसात्मकं काव्यम्, रमणीयार्थप्रतिपादकः शब्दः काव्यम्-इत्यादिषु काव्यलक्षणेषु **शब्दस्य विशेष्यताऽर्थस्य तु विशेषणता**।

अर्थालंकारस्य प्राधान्यं वदतां भामहसूचितानां मनीषिणां मते शब्दप्रतिपाद्योऽर्थः काव्यमिति प्रतीयते।

शब्दार्थौ सहितौ काव्यम्, तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापिइत्यादिषु काव्यलक्षणेषु **शब्दार्थयोरुभयोरेव विशेष्यता**।

तत्र तृतीय एव पक्षः सिद्धान्तरूपेण स्वीकृतः। एवमलंकारशास्त्रे यत् काव्यस्वरूपं प्रतिपादितं तस्य मूलं महाकवयः तैः प्रणीतानि काव्यानि च। महाकवयः काव्यस्य स्वरूपमध्वनन्। तत्र माघस्य मते काव्यस्वरूपं किम्, कस्तस्य काव्यशास्त्रीयः सिद्धान्तः, अलंकारशास्त्रेषु माघस्य कः प्रभावश्चेति समासेनेह प्रतिपाद्यते। विचारणीया विषयबिन्दव इमे सन्ति -

**महाकविमाघः**

सुप्रभदेवस्य पौत्रः, दत्तकस्य पुत्रः, स्वजन्मालंकृतभीनमालग्रामः, निवेशितानेकलोक-शास्त्ररहस्यस्य विंशतिसर्गात्मकस्य लक्ष्मीपति-चरितचिन्तनप्रधानप्रयोजनस्य शिशुपालवधमहा-काव्यस्य कर्ता, दानशौण्डो माघः ख्रिष्टशताब्द्या उत्तरार्धे (650-700 ई.)बभूवेति प्राह श्रीबलदेव उपाध्यायः।माघेन शिशुपालवधस्य

**अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना।**
**शब्दविद्येव नो भाति राजनीतिरपस्पशा।।**

इति पद्ये (2.112) काशिकावृत्तिर्न्यासश्च व्याकरणग्रन्थौ ध्वनिताविति माघस्य कालः काशिकाया न्यासस्य च कर्त्रोरुत्तर एव कालो माघस्येति केचन प्राहुः। मल्लीनाथोऽपि हि पद्यस्थं वृत्तिपदं काशिकावृत्तिपरत्वेन व्याचख्यौ। किन्तु रामचन्द्रमिश्रेण स्वकीये संस्कृतसाहित्येतिहासे जगदे यदत्रत्यं **वृत्तिपदं** न्यासपदं च अष्टाध्याय्याः काशिकातोऽपि प्राचीनं कञ्चन वृत्तिग्रन्थं न्यासग्रन्थं च सूचयतः। इदं सप्तमशताब्द्याः पूर्वार्ध एव संभूतेन बाणभट्टेण हर्षचरिते 'प्रसन्नवृत्तयो गृहीतवाक्याः कृतयुगपद-न्यासा लोक इव व्याकरणे' इति वाक्येन ध्वन्यते। अतो माघस्य पूर्वं निर्दिष्टः सप्तमशताब्द्या उत्तरार्ध एव कालः। काशिकाकारात् पश्चात् स कथमपि नेतुं न शक्यते।

**महाकविमाघस्यालंकारशास्त्रेषु प्रभावः**

माघाद् अर्वाचीना आलंकारिका माघस्य काव्यशास्त्रीयसिद्धान्तविषये किं ध्वनन्तीति पूर्वं विचारणीयं भवति। तत एव हि माघसम्मतं काव्यस्वरूपं फलितरूपेण प्रतिपादयितुं शक्यते। आनन्दवर्धनो माघस्यानेन श्लोकेन (3.53)

श्लेषध्वनिं व्यवस्थापयति-

**रम्या इति प्राप्तवतीः पताका,**
**रागं विविक्ता इति वर्धयन्तीः।**
**यस्यामसेवन्त नमद्वलीकाः**
**समं वधूभिर्वलभीर्युवानः।।**

अत्र द्वारकाया वर्णनम्। यस्यां द्वारकायां युवानो रम्यत्वेन पताकाः केतून् प्राप्तवतीः, विविक्ता विजना इति कारणाद् रागम् अनुरागं वर्धयन्तीरुद्दीपयन्तीः, नमद्वलीका नमत्पटलप्रान्ताश्च वलभीश्चन्द्रशाला वधूभिः समं सहाऽसेवन्तेति निराकाङ्क्षो वाक्यार्थः प्रथमं प्रतीयते। ततो व्यञ्जनया रम्यत्वेन पताकाः प्रसिद्धीः प्राप्तवतीभिः, विविक्ताभिः पूतताभिरिति रागम् अनुरागं वर्धयन्तीभिः नमत्त्रिवलीकाभिर्वधूभिः सह तादृशीर्वलभीरसेवन्त युवान इति वाक्यार्थः प्रतीयते। अयं रम्या इत्यादिविशेषणेषु या द्वितीयास्तासां वधूपक्षे तृतीयानां विभक्तीनां स्थापने लभ्यते। इह श्लेषालंकारो व्यङ्ग्यः। अतो श्लेषालंकारध्वनिः। ध्वन्यालोके वध्व इव वलभ्य इति प्रोक्तमित्यत्रोपमाध्वनिरिति न शङ्कनीयम्, ध्वनिकृतोद्भटमतेनेह श्लेषस्य व्यवस्थापनात्। उद्भटमतेनात्र नोपमा, अपितूपमाप्रतिभोत्पत्तिहेतुः श्लेष एव। वधूवलभीपक्षेऽर्थयोर्भिन्नत्वेन साधारणधर्मस्याभावेनोपमा न शक्यते स्वीकर्तुम्। उक्तमुद्भटेन -

**एकप्रयत्नोच्चार्याणां तच्छायां चैव बिभ्रताम्।**
**स्वरितादिगुणैर्भिन्नैर्बन्धः श्लिष्टमिहोच्यते।।**
**अलंकारान्तरगतां प्रतिभां जनयत् पदैः।**
**द्विविधैरर्थशब्दोक्तिविशिष्टं तत् प्रतीयताम्।।**

एवमानन्दवर्धनस्य श्लेषध्वनेः स्थापनाया आधारो माघस्योक्तः श्लोक इति शक्यते वक्तुम्।

**साहित्यदर्पणकारो** नवपलाशपलाशवन-मित्यादिश्लोकं यमकोदाहरणत्वेन जग्राह।

**कुवलयानन्द**कारो वदति यद् यत्र सदृशदर्शनेन सदृशस्य स्मरणं तत्र स्मरणालंकारो भवत्येव, किन्तु स्मृतस्य संबन्धिनोऽपि स्मरणे स्मरणालंकारो भवति। स एतत् साधयितुं माघस्य श्लोकमिममुद्धरति-

**दिव्यानामपि कृतविस्मयां पुरस्ताद्**
**अम्भस्तः स्फुरदरविन्दचारुहस्ताम्।**
**उद्वीक्ष्य श्रियमिव काञ्चिदुत्तरन्तीम्**
**अस्मार्षीज्जलनिधिमन्थनस्य शौरिः।।** -8.64

अत्र भगवति कृष्णे सलिलादुत्तरन्त्याः कस्याश्चन नायिकाया दर्शनेन तत्सदृश्याः श्रियः स्मरणं तेन च श्रीसम्बन्धिसमुद्रमथनस्य स्मरणं वर्णितम्। समुद्रमन्थनं यद्यपि तया नायिकया सदृशं नास्ति, तथापि तस्य स्मरणस्य मूलं सादृश्यमेव वर्तते। अत एवाप्पयदीक्षितेन स्वाभिहिते -

**स्मृतिः सादृश्यमूला या वस्त्वन्तरसमाश्रया।**
**स्मरणालंकृतिः सा स्यादव्यङ्ग्यत्वविशेषिता।।**

इति स्मरणालंकारस्य लक्षणे वस्त्वन्तर-समाश्रयेति कथितम्। अनेन सदृशासदृश-साधारण्यरूपोऽर्थो विवक्षितः। एतादृशस्य स्मरणालंकारविशेषस्य मूलं माघस्यायं श्लोक इति शक्यते वक्तुम्।

**व्यक्तिविवेककारो** व्यक्तिविवेके क्त्वा-प्रत्ययस्थले क्रिययोर्भिन्नकर्तृकत्वभ्रमस्य कारणं कर्तुरनु-पादानमपि मनुते, एतस्योदाहरणं माघस्यैवेमं श्लोकं गृह्णाति च -

**ननु सर्व एव समवेक्ष्य कमपि गुणमेति पूज्यताम्।**
**सर्वगुणविरहितस्य परिपूजया कुरुनरेन्द्र को गुणः।।**

अत्र समवेक्षापूजयोरनुक्तः कर्ता पूजायाः कृत्यप्रत्ययार्थे कर्मणि गुणीभावश्च भिन्नकर्तृकत्व-भ्रमस्य कारणं वर्तते।

एवमेवाभिधावृत्तमातृकाकारो **मुकुलभट्टो** माघस्येमं श्लोकं दुष्टाया लक्षितलक्षणाया उदाहरणं मनुते –

**मध्येसमुद्रं ककुभः पिशङ्गी-**
**र्या कुर्वती काञ्चनवप्रभासा।**
**तुरङ्गकान्तामुखहव्यवाह-**
**ज्वालेव भित्त्वा जलमुल्ललास।।** (3.11)

अत्र तुरङ्गकान्ताशब्दः स्ववाच्यवाचकत्व-संबन्धेन वडवाशब्दं लक्षयति, तेन च हव्यवाहशब्द-संनिधानेन वडवाग्निरूपोऽर्थो बोध्यते। एवं तुरङ्गकान्ताशब्दस्य वडवाशब्दे रूढेरभावेनैषा लक्षणा दुष्टेति तात्पर्यम्।

एवं नानालंकारग्रन्थेषु माघस्य श्लोका लभ्यन्ते, तेषामन्वेषणेनैकः **शोधप्रबन्धः** शक्यते निर्मातुम्। अत्र तु माघस्यालंकारग्रन्थेषु यः प्रभावस्तस्य दिगेव दर्शिता।

**महाकविमाघसम्मतं काव्यलक्षणम्**

महाकवेमग्रिस्याभ्यां श्लोकाभ्यां तदीया काव्यविषयाऽवधारणा भवति स्फुटा–

**नालम्बते दैष्टिकतां न निषीदति पौरुषे।**
**शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।।**

–2.86

**तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः।**
**नैकमोजः प्रसादो वा रसभावविदः कवेः।।**

–2.83

अत्र प्रथमेन श्लोकेन स्फुटं यन्माघमते शब्दार्थौ काव्यम्। कविः सन् स जानाति यच्चमत्कृतिः क्वचन शब्दगतालंकारादावर्थविशिष्टे शब्दे, कुत्रचिच्चार्थालंकारादौ शब्दविशिष्टेऽर्थे विश्राम्यतीत्युभयोरेव काव्यत्वं व्यासक्तम्। न केवलः शब्दो नापि केवलोऽर्थो वा शक्नोति हि चमत्कृतिमाधातुम्। द्वितीयेन श्लोकेन ध्वन्यते यत् कविना रसभावपरेण भाव्यम्, रसभावौ तयोरपि च हि रस एव काव्ये प्रधानम्। रसानुसारेणैव गुणा अलंकाराश्च प्रयोज्याः।

महाकविना **कालिदासेनापि** शब्दार्थयोरेव काव्यत्वं 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये' इत्यादिनाऽभिव्यञ्जितम्। माघोऽपि कालिदासीयमेव मतं स्वीकरोति। आलंकारिकैरपि भामहादिभिः तथैव स्वीकृतम्–शब्दार्थौ सहितौ काव्यम्। अतएव **ध्वनिकारेण** यत्रार्थः शब्दो वेत्यादौ ध्वनिलक्षणे शब्दार्थयोरुभयोः संनिवेशः कृतः।

एवं माघसम्मतं काव्यलक्षणमेवं वक्तुं शक्यते–

**शब्दार्थौ सगुणौ सालंकारौ रसप्रकाशकौ।**
**काव्यमेवं ध्वनन् माघः तथा काव्यमरीरचत्।।**

इति।

– पूर्वसमन्वयकः, संस्कृतसाहित्यविद्याशाखायाः,
केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः
दूरभाषाङ्कः ९४६२८६४३०७

# माघस्य पाण्डित्यम्

❑ डॉ. नाथूलालसुमनः

**विरक्तश्चेद् दुरुक्तिभ्यो निर्वृतिं वाऽथ वाञ्छसि।**
**वयस्य कथ्यते तथ्यं माघसेवां कुरुष्व तत्।।**

– सोमेश्वरः

माघः महाकविस्तु आसीदेव किन्तु सर्वशास्त्रतत्त्वज्ञो विद्वान् अपि आसीत्। भारविकाव्ये 'किरातार्जुनीये' राजनीतिपटुता दृश्यते, श्रीहर्षस्य नैषधीयचरिते दार्शनिकोद्भटता उपलभ्यते किन्तु माघकाव्ये तु सर्वशास्त्राणां परिनिष्ठितज्ञानं दरीदृश्यते। अतएव बृहत्त्रय्यां शिशुपालवधस्य मुख्यं स्थानं वर्तते। शिशुपालवधं परिशील्य माघस्य बहुज्ञता परिलक्ष्यते। मुरारिकृतस्य अनर्घराघवस्य अध्ययनार्थं माघकाव्यं सोपानवत् अस्ति –

**मुरादिपदचिन्ता चेत् तदा माघे रतिं कुरु।**
**मुरारिपदचिन्ता चेत् तदा माऽघे रतिं कुरु।।**

माघं प्रशंसयन् आचार्यः कपिलदेवः वदति –

**कवितावनितावृतबन्धवरः**
**सरसालिरसालरसान्वितधीः।**
**रसभावविभाभृतभूरियशाः**
**कविमाघवरः कृतिचित्तहरः।।**

माघकाव्यस्य नवसर्गसमाप्तिपर्यन्तं नवीनशब्दः नावशिष्यते। तस्य विशालं शब्दकोशं दृष्ट्वा उक्तं केनापि –

**नवसर्गगते माघे नवशब्दो न विद्यते।**

स्वकाव्यकौशलेन माघः भारविम् अपि अतिशेते, अतएव हरिहरेणोक्तम् –

**नैतच्चित्रमहं मन्ये माघमासाद्य मन्मुहुः।**
**प्रौढतातिप्रसिद्धापि भारवेरवसीदति।।**

माघजयन्त्यवसरेऽस्मिन् वयमपि तस्य पाण्डित्यपूर्णानि विविधविषयकानि कानिचन पद्यानि स्मृत्वा श्रद्धाञ्जलिं समर्पयामः।

श्रुतिविषयकं ज्ञानम् –

**शब्दितामनपशब्दमुच्चकैः-**
**र्वाक्यलक्षणविदोऽनुवाक्यया।**
**याज्यया यजनकर्मिणोऽत्यजन्**
**द्रव्यजातमपदिश्य देवताम्।।**

–शिशुपालवधम्,१४/२०

उदात्तादिवैदिकस्वरविषयकप्रसिद्धनियमस्य प्रतिपादनम् –

**तदीशितारं चेदीनां, भवांस्तमवमंस्त मा।**
**निहन्त्यरीनेकपदे य उदात्तः स्वरानिव।।**

–तदेव,२/९५

सांख्यानुरूपं नारदकृता श्रीकृष्णस्तुतिः –

**उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथञ्चन।**
**बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः।।**

–तदेव, १/३३

योगशास्त्रस्य पारिभाषिकशब्दावली –

**मैत्र्यादिचित्तपरिकर्मविदो विधाय**
**क्लेशप्रहाणमिह लब्धसबीजयोगाः।**
**ख्यातिं च सत्त्वपुरुषाऽन्यतयाधिगम्य**
**वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम्।।**४/४५

बौद्धदर्शनस्य राजनीतिशास्त्रस्य च सिद्धान्ता एकस्मिन् एव पद्ये गुम्फिताः –

**सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम्।**
**सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम्।।**
– तदेव, २/२८

उपमालंकारमाध्यमेन व्याकरणज्ञानम् –

**निपातितसुहृत्-स्वामिपितृव्यभ्रातृमातुलम्।**
**पाणिनीयमिवाऽऽलोकि धीरैस्तत् समराजिरम्।।**
– तदेव, १९/७५

संगीतशास्त्रस्य मूलतत्त्वानां निदर्शनम् –

**श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः,**
**सततमृषभहीनं भिन्नकीकृत्य षड्जम्।**
**प्रणिजगदुरकाकुश्रावकस्निग्धकण्ठाः,**
**परिणतिमिति रात्रेर्मागधा माधवाय।।**
– तदेव, ११/१

अलङ्कारशास्त्रमाध्ययेन राजनीतिशास्त्रस्य गूढतत्त्वानामवबोधनम् –

**स्थायिनोऽर्थे प्रवर्तन्ते भावाः सञ्चारिणो यथा।**
**रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः।।**
– तदेव, २/८७

भामह–वामन–मम्मट–रुद्रटादिवत् माघः शब्दार्थौ काव्यं स्वीकरोति –

**नालम्बते दैष्टिकतां न निषीदति पौरुषे।**
**शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।।**
– तदेव, २/८६

उपमावैशिष्ट्यस्य दिङ्मात्रम् –

**अरुणजलजराजीमुग्धहस्ताग्रपादा,**
**बहुलमधुपमाला कज्जलेन्दीवराक्षी।**
**अनुपतति विरावैः पत्त्रिणां व्याहरन्ती,**
**रजनिमचिरजाता पूर्वसन्ध्या सुतेव।।**
– तदेव, ११/४०

विविधशास्त्रज्ञानमाध्यमेन अर्थगौरवम् –

**बलावलेपादधुनापि पूर्ववत्-**
**प्रबाध्यते तेन जगज्जिगीषुणा।**
**सती च योषित्प्रकृतिश्च निश्चला**
**पुमांसमभ्येति भवान्तरेष्वपि।।** – तदेव, १/७२

**उपप्लुतं पातुमदो मदोद्धतैस्-**
**त्वमेव विश्वम्भर! विश्वमीशिषे।**
**ऋते रवेः क्षालयितुं क्षमेत कः**
**क्षपातमस्काण्डमलीमसं नभः।।** – तदेव, १/३८

रमणीयतायाः लक्षणम् –

**दृष्टोऽपि शैलः स मुहुर्मुरारे-**
**रपूर्ववद्विस्मयमाततान।**
**क्षणे क्षणे यन्नवतामुपैति**
**तदेव रूपं रमणीयतायाः।।** – तदेव, ४/१७

पदानां सुकुमारता, वर्णानां माधुर्यं, भाषायाः सङ्गीतात्मकता, अतएव पदलालित्यं –

**नवपलाशपलाशवनं पुरः**
**स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत्**
**स सुरभिं सुरभिं सुमनोभरैः।।** –तदेव, ६/२

**वदनसौरभलोभपरिभ्रमद्**
**भ्रमरसंभ्रमसंभृतशोभया।**
**चलितया विदधे कलमेखला**
**कलकलोऽलकलोलदृशाऽन्यया।।**–तदेव, ६/१४

अनुप्रासमाध्यमेन भाषायाः सङ्गीतात्मकता –

**मधुरया मधुबोधितमाधवी**
**मधुसमृद्धिसमेधितमेधया।**
**मधुकराङ्गनया मुहुरुन्मदध्वनिभृता**
**निभृताक्षरमुज्जगे।।** – तदेव, ६/२०

रैवतकपर्वतस्य आलङ्कारिकवर्णनेन मुग्धाः समालोचकाः माघं 'घण्टामाघ' इति उक्तवन्तः –

**उदयति विततोर्ध्वरश्मिरज्जा-**
**वहिमरुचौ हिमधाम्नि याति चास्तम्।**
**वहति गिरिरयं विलम्बिघण्टा-**
**द्वयपरिवारितवारणेन्द्रलीलाम्।।** –तदेव, ४/२०

एवमेव अन्यत्र अपि प्रातःकालस्य वर्णनम् –

**परिणतमदिराभं भास्करेणांशुबाणैः**
**तिमिरकरिघटायाः सर्वदिक्षु क्षतायाः।**
**रुधिरमिव वहन्त्यो भान्ति बालातपेन**
**च्छुरितमुभयरोधोवारितं वारि नद्यः।।** ११/४९

इतोऽपि–

**उदयशिखरिशृङ्गप्राङ्गणेष्वेव रिङ्गन्,**
**सकमलमुखहासं वीक्षितः पद्मिनीभिः।**
**विततमृदुकराग्रः शब्दयन्त्या वयोभिः,**
**परिपतति दिवोऽङ्के हेलया बालसूर्यः।।** ११/४७

प्रातःकालस्य वर्णने प्रकृतिचित्रणम् –

**कुमुदवनमपश्रि श्रीमदम्भोजखण्डं**
**त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः।**
**उदयमहिमरश्मिर्याति शीतांशुरस्तं**
**हतविधिलसितानां ही विचित्रो विपाकः।।**
–तदेव, ११/६४

जकार-रेफमाध्यमेन शब्दक्रीडा अपि प्रेक्षणीया–

**राजराजी रुरोजाजेरजिरेऽजोऽजरोऽरजाः।**
**रेजारिजूरजोर्जार्जी रराजर्जुरजर्जरः।।** १९/१०२

भगवद्विषयकरतिरपि आस्वादनीया –

**यां यां प्रियः प्रैक्षत कातराक्षी**
**सा सा ह्रिया नम्रमुखी बभूव।**
**निःशङ्कमन्याः सममाहितेर्ष्या-**
**स्तत्रान्तरे जघ्नुरमुं कटाक्षैः।।** –तदेव, ३/१६

श्लेषालङ्कारस्य छटा –

**प्रतिकूलतामुपगते हि विधौ,**
**विफलत्वमेति बहुसाधनता।**
**अवलम्बनाय दिनभर्तुरभू-**
**न्न पतिष्यतः करसहस्रमपि।।** –तदेव, ९/६

मुरजबन्ध-चक्रबन्ध-सर्वतोभद्रादीनां चित्रालङ्काराणामपि बन्धनं माघेन कृतम्। सर्वतोभद्रः द्रष्टव्योऽत्र –

स का र ना ना र का स
का य सा द द सा य का।
र सा ह वा वा ह सा र
ना द वा द द वा द ना।। १९/२७

एवं ज्ञायते यत् माघः वेद-व्याकरण-काव्यशास्त्र-दर्शन-राजनीति-नीतिशास्त्र-आयुर्वेद-सङ्गीत-पुराणादिविद्यासु विशेषव्युत्पत्तिं प्राप्तवान्। अत एव प्रभावकचरिते कविना उक्तम् –

**श्रीमाघोऽस्ताघधीः श्लाघ्यः प्रशस्यः कस्य नाभवत्।**
**चित्तजाड्यहरा यस्य काव्यगङ्गोर्मिविप्रुषः।।**

श्रीकृष्णचरितवर्णनेन माघः पापनाशनं कृतवान्, अतः सः पापहर्ता अस्ति, यथोक्तमाचार्य-कपिलदेवेन –

**रसज्ञशिशुपालोऽपि, शिशुपालवधप्रियः।**
**कृष्णवृत्तश्लाघालिर्माघो घोराघध्वंसकृत्।**।इति।

**– निदेशकचरः,**
राजस्थानसंस्कृत-अकादमी, जयपुरम्।

# काव्येषु माघः

❑ डॉ. अञ्जना शर्मा

संस्कृतसाहित्यस्य कविषु कालिदासमाघ-कविद्वयस्य वैशिष्ट्यं द्योतयति लोकोक्तिरियं- 'काव्येषु माघः कवि-कालिदासः'। कवित्वदृष्ट्या कालिदासः श्रेष्ठः काव्येषु माघश्च। माघः न केवलं काव्यशास्त्रस्यैव पारदृश्वा अपितु अनेकशास्त्र-निष्णातश्च। अस्य चमत्कृतिकरं पाण्डित्यं काव्यकलाञ्च प्रेक्ष्य प्रेक्षावन्तोऽस्य काव्यं प्रशंसन्ति। काव्ये प्रतिपदं पदलालित्यं माधुर्यं चावलोक्य विपश्चिद्भिरुदाह्रियते- काव्येषु माघः इति। कवेरेतस्य गौरवाधायकं ग्रन्थरत्नमेकमेव काव्यं 'शिशुपाल-वधमि'ति। महाकाव्येऽस्मिन् श्रीकृष्णेन शिशुपालस्य वधः कृत इति इतिहासप्रसिद्धं संक्षिप्तं इतिवृत्तं काव्यकौशलेन विंशतिसर्गेषु मनोज्ञतया उपन्यस्तम्। महाकाव्यस्य नायकः श्रीकृष्णः प्रतिनायकः शिशुपालश्च। दुष्टशिशुपालस्य वधत्वेन नायकस्य उत्कर्षद्योतनाय एव अस्य महाकाव्यस्य नामकरणं प्रतिनायकनाम्ना कृतम्। महाकाव्यस्य लक्षणानुसारं प्रायः काव्यस्य नामकरणं कवेर्वृत्तस्य नायकस्य वा नाम्ना एव भवितव्यम्।[१] किन्तु शिशुपालवधस्य नामकरणं काव्यलक्षणपरम्परायां विशिष्टमिति। महाकाव्ये वीररसस्य प्राधान्येऽपि शृङ्गारहास्याद्भुत-भयानकादयः रसाः सम्यक्तया सन्निविष्टाः।

महाकाव्यस्य प्रारम्भः श्रीशब्देन भवति –

**श्रियः पतिः श्रीमति शासितुं**
**जगज्जगन्निवासो वसुदेवसद्मनि।**
**वसन् ददर्शावतरन्तमम्बरा-**
**द्धिरण्यगर्भाङ्गभुवं मुनिं हरिः॥**[२]

पद्येऽस्मिन् आदौ कविर्माघः काव्यफल-शिशुपालवधबीजभूतं भगवतः श्रीकृष्णस्य नारददर्शनरूपं वस्तु श्रीशब्दप्रयोगपूर्वकं निर्दिशन् कथामुपक्षिपति। सम्पूर्णे महाकाव्ये श्रीकृष्णस्य महिमानं गायति।

महाकाव्यस्य लक्षणानुसारं शिशुपालवधस्य वर्णनवैविध्यं तु अतीव रोचते। न केवलं भौगोलिकस्थलानां अपितु प्रकृत्या वर्णनमप्युत्कृष्ट-मस्ति। यथाहि षष्ठसर्गे षड्ऋतूनां वर्णने यमकपूर्वकं द्रुतविलम्बितछन्दसः प्रयोगः हृद्यः –

**समय एव करोति बलाबलं**
**प्रणिगदन्त इतीव शरीरिणाम्।**
**शरदि हंसरवाः परुषीकृत-**
**स्वरमयूरमयूरमणीयताम्॥**[३]

अत्र शरद्वर्णने सामान्यतयोक्तमपि सौन्दर्यकरं यद् प्राणिनां बलाबलस्य हेतुः समय एवास्ति। एवमेव प्रभाते प्राकृतिकपदार्थानां सुखदुःखस्य हेतुः दैवकार्याणां परिणामः एव इति निर्देशः एकादशसर्गे विद्यते –

**कुमुदवनमपश्रि श्रीमदम्भोजषण्डं**
**त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः।**
**उदयमहिमरश्मिर्याति शीतांशुरस्तं**

**हतविधिलसितानां ही विचित्रो विपाकः।।**[8]

माघस्य विशालं शब्दकोशमुद्वीक्ष्य निगद्यते- 'नवसर्गगते माघे नव शब्दो न विद्यते'। वस्तुतः प्रशस्तिरियं बृहत्त्रय्या विषयेऽस्ति

**नवसर्गे किराते च नवसर्गे च नैषधे।**
**नवसर्गगते माघे नवशब्दो न जायते।।**[9]

तात्पर्यमस्याः यत् किरातार्जुनीयनैषधीय-चरितशिशुपालवधकाव्यानां नवसर्गाणां समाप्तौ न नवीनः शब्दोऽवशिष्यते। किन्तु अस्या उत्तरार्धस्य प्रसिद्ध्या माघस्य वैशिष्ट्यं स्पष्टमेव प्रतिभाति। तेन नवसर्गेषु नवनवाः शब्दाः प्रयुक्ताः। तद्यथा एकादशसर्गे त्रयश्चत्वारिंशत् (43) पद्यात् आरभ्य (67) सप्तषष्टिपर्यन्तेषु पद्येषु सूर्यवर्णनं कृतम्। किन्तु कुत्रापि सूर्यस्य कस्यापि नाम्नः पुनरावृत्ति न कृता। सर्वत्र नवीनः शब्दः प्रयुक्तः, यथाहि वासराणां विधातुः (43), अर्कः (44), विवस्वान् (45), अतुहिनरुचिना (46), बालसूर्यः (47), सप्तसप्तिः (48) भास्करेण (49), तपनः (50) इत्यादयः।

माघस्य पाण्डित्यं कवित्वं चासाधारणम्। माघकाव्यस्य काव्यार्थज्ञानाय बहुकालं अपेक्षते। अतएव साधूच्यते-'माघे मेघे गतं वयः'। मेघदूतं माघकाव्यं चेति द्वयमेवाऽऽजन्मपरिशीलयतां उक्तिरियं प्रसिद्धा।

माघकाव्यविषये अन्या प्रसिद्धोक्तिस्समुपलभ्यते-

**मुरारिपदचिन्ता चेत्तदा माघे रतिं कुरु।**
**मुरारिपदचिन्ता चेत्तदा माऽघे रतिं कुरु।।**

मुरारिकवेः कृतेरतिक्लिष्टतया तदर्थावबोधार्थं यथोचितशब्दार्थज्ञान-जननं माघकाव्यं पूर्वं परिशीलनीयम्, अथ च मुरारेः श्रीकृष्णस्य चरणारविन्दप्राप्तिचिन्ताया परिस्थितौ पापेभ्यो मानसी प्रवृत्तिः परावर्तनीया इति।

माघः भारविप्रवर्तितमलंकारपद्धतिमनुसृत्य तस्या प्रौढत्वं नयति। यद्यपि किरातार्जुनीयशिशुपाल-वधकाव्ययोः पर्याप्तं साम्यं लक्ष्यते। भारविणा किरातार्जुनीये शिवस्य गुणगानं कृतं, तथैव माघेन श्रीकृष्णस्य। द्वयोः काव्ययोः कथानकं महाभारताद् गृहीतम्। द्वयोः आरम्भः '**श्री**' शब्देन भवति। प्रथमसर्गस्य प्रवर्तनं संवादेन एवास्ति। किरातार्जुनीये युधिष्ठिर-वनेचरसंवादः, शिशुपालवधे कृष्ण-नारदसंवादश्च। काव्यद्वये ऋतूनां वर्णनमपि चेतोहरम्। भारविः शरदृतुं वर्णयति, माघः षड्ऋतूनपि। पर्वतवर्णने भारविणा हिमालयः छन्दोभिर्विविधैः अलंकृतं तथैव माघेन रैवतको गिरिश्च। जलक्रीडा-प्रभातसन्ध्याचन्द्रोदययुद्धादिषु वर्णनेषु माघो भारवेः श्रेष्ठः प्रतीयते। भारवेः अपेक्षया माघकाव्ये भावाभिव्यञ्जनं भाषासौष्ठवम् अलंकारसौन्दर्यं वर्णननैपुण्यञ्चाधिकं दृश्यन्ते। एतेन भारविणा प्रणीतं किरातार्जुनीयं निष्प्रभतां गतम्। अतएव विपश्चिद्भिः उच्यते- **तावद्भा भारवेर्भाति यावन्माघस्य नोदयः**।

माघस्य प्रशस्तिषु सर्वाधिका प्रसिद्धा अस्ति- 'माघे सन्ति त्रयो गुणाः'। अस्यां कालिदासभार-विदण्डिकविभिः सह माघस्य वैशिष्ट्यमुक्तम्। संपूर्णं पद्यमस्ति-

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥**

माघकाव्ये कालिदासभारविदण्डिकवीनां गुणानां समाहारो वर्तते। महाकवेः कालिदासस्य कृतिषु उपमानां मनोहरः प्रयोगः, भारवेः कृतौ किरातार्जुनीये अर्थगौरवस्य सौन्दर्यं, दण्डिनः कृतौ दशकुमारचरिते पदलालित्यस्य माधुर्यं च विद्यते। किन्तु एषां गुणत्रयाणामपि समाहारो महाकविर्माघः स्वकीये काव्ये विधत्ते। एभिः सौन्दर्यं माधुर्यं सालंकृतत्वं चापि धत्ते। अत्र अवधेयं यत् माघेन यद्यपि उपमा-अर्थगौरव-पदलालित्यत्रयाणां समाहारः कृतः तथापि नोपमाप्रयोगे स कालिदासम् अतिशेते, अर्थगौरवे च भारविम्। पदलालित्ये नूनं स दण्डिनम् अतिशेते। तस्य पदलालित्यं सर्वातिशायि। माघः त्रयाणां गुणानामपि प्रयोगे नितरां कुशलः।

माघेन शतशः स्थलेषु उपमायाः प्रयोगः कृतः। तासु उपमासु शास्त्रीयं ज्ञानं काव्यगौरवञ्च तस्य गरिमाणं प्रथयति। उपमाप्रयोगे कौशल्येनैव स **'घण्टामाघ'** इति प्रसिद्धिमवाप। रैवतकपर्वतवर्णने सूर्योदयं चन्द्रस्य चास्तगमनं वर्णयित्वा स घण्टामाघतां गतः। चतुर्थसर्गे पुष्पिताग्राछन्दसि पद्यमस्ति -

**उदयति विततोर्ध्वरश्मिरज्जा-**
**वहिमरुचौ हिमधाम्नि याति चास्तम्।**
**वहति गिरिरयं विलम्बिघण्टा-**
**द्वयपरिवारितवारणेन्द्रलीलाम्॥**[5]

रैवतकाचलो विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलां वहति।

द्वितीयसर्गे संगीतशास्त्रस्य काव्यशास्त्रस्य च महत्त्वं वैचित्र्यं चोपमया प्रकटयन् आह कविर्यद् वाङ्मये कतिपये एव वर्णाः सन्ति, संगीतशास्त्रे च सप्तस्वराः, परं तेषामुपादानेन वैचित्र्यजनकं शास्त्रम् उदेति -

**वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव।**
**अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता॥**[6]

उपमा-प्रयोगे शास्त्रीयस्य पाण्डित्यस्यापि अपूर्वः समन्वयो लक्ष्यते। सांख्यदर्शनानुसारं पुरुषोऽकर्ता सन् भोक्ता अस्ति। पुरुष उदासीन अपि बुद्धिकृतकर्मणां फलभाग् भवति। तथैव कृष्णः साक्षिमात्रोऽपि सेनाकृतविजयस्य फलभोक्ता भविष्यति -

**विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम्।**
**फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि॥**[7]

माघकाव्ये अर्थगौरवं पर्याप्तं विलसति। स्वल्पशब्दैः गंभीरभावानाम् अभिव्यक्तिरेवार्थ-गौरवम्। अर्थगौरवान्वितानां श्लोकानां महती परम्परा माघकाव्ये वर्तते। कानिचन उदाहरणानि द्रष्टव्यानि

- कवि मानहीनस्य जीवनं तृणमिव तुच्छं मन्यते। तेनोक्तं 'सदाभिमानैकधना हि मानिनः'। (1/67)
- रामणीयकस्य लक्षणं कवेर्बुद्धिवैशारद्यं सूचयति-
- **क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।** (4/17)

एवमेवान्यानि उदाहरणानि-

- **श्रेयसि केन तृप्यते ।( 1/29 )**
- **महीयांसः प्रकृत्या मितभाषिणः ।( 2/13 )**
- **क्रियासमभिहारेण विराध्यन्तं समेत कः। ( 2/43 )**
- **समय एव करोति बलाबलम्।( 6/45 )**
- **भवति महत्सु न निष्फलः प्रयासः।( 7/1 )**
- **गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः।( 1/14 )**

माघकाव्ये **पदलालित्यं** पदे पदे प्रेक्ष्यते। पदानां श्रुतिमधुरविन्यासं पदलालित्यं मन्यते। तत् तु कोमलकान्तपदावलीभिः सानुप्रासपदैः वा निष्पद्यते। शिशुपालवधस्य षष्ठसर्गे यमकमयपद्येषु लालित्यस्य प्राचुर्यं दृश्यते। वसन्तऋतौ मधुकरगुञ्जनस्य ध्वनिमयं चित्रं निर्मितं कविना-

**मधुरया मधुबोधितमाधवी-**
**मधुसमृद्धिसमेधितमेधया।**
**मधुकराङ्गनया मुहुरुन्मद-**
**ध्वनिभृता निभृताक्षरमुज्जगे॥**[९]

वसन्तसौन्दर्यवर्णने यमकालंकारालंकृत-भाषाश्रयणेन पदलालित्यस्य सुप्रसिद्धमुदाहरणम् -

**नवपलाशपलाशवनं पुरः,**
**स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत्,**
**स सुरभिं सुरभिं सुमनोभरैः॥**[१०]

पवनवर्णने पदलालित्यस्य निवेशः मनोहरः-

**विकच कमलगन्धैरन्धयन् भृङ्गमालाः**
**सुरभितमकरन्दं मन्दमावाति वातः।**
**प्रमदमदनमाद्यद्-यौवनोद्दामरामा-**
**रमणरभसखेदस्वेदविच्छेददक्षः।।**[११]

एवं गुणत्रयेऽपि कवित्वं माघस्य प्रशस्यम्। अतएव साधु प्रोच्यते - '**काव्येषु माघः**' इति।

**सन्दर्भः** -


१. साहित्यदर्पणं, 6-324

२. शिशुपालवधं, 1-1

३. शिशुपालवधं, 6-44

४. तत्रैव, 11-64

५. संस्कृत साहित्य का इतिहास, उमाशङ्कर शर्मा, पृ. 268

६. शिशुपालवधं, 4-20

७. शिशुपालवधं, 2-72

८. तत्रैव, 2-59

९. शिशुपालवधं, 6-20

१०. तत्रैव, 6-2

११. तत्रैव, 11-19

# महाकवेर्माघस्य काव्यशास्त्रीयं ज्ञानम्

डॉ. बाबूलालः मीना *
डॉ. आशा सिंह रावत * *

महाकविः माघः संस्कृतकाव्यजगतः अनर्घरत्नेषु अन्यतमोऽस्ति। तस्य शिशुपालवधं महाकाव्यं बृहत्त्रय्याः अद्वितीयं रत्नं वर्तते। अस्मिन् महाकाव्यस्य सर्वाणि लक्षणानि प्राप्यन्ते। माघः स्वमहाकाव्ये स्वपूर्ववर्तिनां सर्वेषां कवीनामुत्कृष्टगुणानां समन्वयमकरोत्। सः कालिदासात् काव्यसौन्दर्यं, भारवेरर्थगौरवं भट्टेः च व्याकरणपाटवं संकलितवान्। इदं महाकाव्यं संस्कृतवाङ्मये सर्वेभ्यः परवर्तिभ्यः कविभ्यः सर्वथा अनुकरणीयं विद्यते।

माघेन शिशुपालवधमहाकाव्ये महाभारतस्य सभापर्वणः शिशुपालवधस्य लोकप्रिया कथा स्वउक्तिवैचित्र्यपूर्णायाम् अलंकृतशैल्यां प्रस्तुता। शब्दार्थयोः मनोहरसामंजस्य, सर्वत्र नवीनशब्दा-वल्याः अभिनव पदशय्याप्रयोगस्य वा कारणेन शिशुपालवधमहाकाव्यस्य बृहत्त्रय्यां महत्त्वपूर्णं स्थानं विद्यते। वस्तुतः माघस्य काव्यं भाषाप्रौढ़तायाः दृष्ट्या वर्णनवैचित्र्येण, अलंकारप्रयोगदृष्ट्या छन्दो-योजनया, दार्शनिकज्ञानेन, भावरसपरिपाकदृष्ट्या च शास्त्रीयपाण्डित्यस्य सर्वतोमुखी-प्रतिभायाश्च निदर्शनमस्ति। मूलतः माघः महाकविना सह दार्शनिकः वैयाकरणश्चापि आसीत्। सः विविधविषमगुणगणैः समन्वितआसीत्, अत एव तस्य महाकाव्ये विविधविषयाणां ज्ञानं स्थाने स्थाने प्राप्यते। सः तत्कालीनयुगे प्रचलितानां ब्राह्मणानां कृते उपादेयानां शास्त्राणां ज्ञानं धारयति स्म। किं बहुना, संक्षेपेण, माघस्य सकलेषु शास्त्रेषु अद्भुतः प्रवेशः आसीत्।

वस्तुतः महाकविः माघः केवलं महावैयाकरणः दार्शनिकश्च न आसीत् अपितु काव्यशास्त्रस्य अपि महान् ज्ञाता आसीत्। तेन स्वकाव्ये काव्यशास्त्रीयानां रसानां अलंकाराणां, छन्दसाम्, गुणानाम्, रीतीनाम् इत्यादीनां सर्वत्र वर्णनं कृतम्। सममेव शब्दार्थभावानां निरूपणमपि कृतम्। शिशुपालवधस्य अध्ययनेन ज्ञायते यत् सः स्वमहाकाव्ये स्वसमय-मान्यतानुसारं शब्दार्थसहभावमेव काव्यलक्षणं स्वीकरोति स्म, यथा भामहादयः स्वीकुर्वन्तिस्म -

**नालम्बते दैष्टिकतां न निषीदति पौरुषे।**
**शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।।**[1]

सः अकथयत् सत्कविः शब्दार्थौ न उपेक्षेत। न केवलं शब्दः, न केवलमर्थः काव्यम् कथयितुं शक्यते। एवमेव काव्यलक्षणसम्बन्धे महाकवेः

* आचार्यः स्नातकोत्तरसंस्कृतविभागः,
एम0 एस0 जे0 राजकीयः महाविद्यालयः,
भरतपुरम् (राजस्थानम्)

** स्नातकोत्तरसंस्कृतविभागाध्यक्षा,
शासकीयः के0आर0जी0 स्वशासी महाविद्यालयः,
ग्वालियरम् (मध्यप्रदेशः)

माघस्य दृष्टिः समन्वयात्मिका अस्ति। सः काव्ये शब्दार्थयोः स्थितेः अतिदूरे रसस्थितिमपि अपरिहार्यां मन्यते। तस्य मन्तव्यमस्ति यत् रसावस्थां प्राप्नुवतां स्थायिभावानां संचारिभावाः सहायकाः भवन्ति –

**स्थायिनोऽर्थे प्रवर्तन्ते भावाः संचारिणो यथा।**
**रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः।।**

अनेन कथनेन ज्ञायते यत् तस्य शब्दार्थौ सरसौ स्याताम्। एवमेव काव्ये सः गुणानां स्थितिमपि अपरिहार्यां मन्यते। तस्य कथनमस्ति यत् रसभावविदः कवयः केवलं ओजांसि (ओजः) प्रसादं च न अनुसरन्ति अपितु द्वयोरेव गुणयोः यथावसरम् अनुसरणं कुर्वन्ति –

**तेजः क्षमा वा नैकन्तं कालज्ञस्य महीपतेः।**
**नैकमोजः प्रसादो वा रसभावविदः कवेः।।**

प्रकारान्तरेण तत्काव्यानुशीलनेन ज्ञायते यत् काव्ये दोषस्थानम् अक्षम्यमस्ति। माघः कथयति यत् कुशलकवयः कोमलपदावलीमपि माधुर्यादिगुण-माध्यमेन श्लेषादिगुणमाध्यमेन वा वैचित्र्ययुक्तां कुर्वन्ति –

**म्रदीयसामपि घनामनल्पगुणकल्पिताम्।**
**प्रसारयन्ति कुशलाश्चित्रां वाचं पटीमिव।।**

यद्यपि माघः स्वकाव्येऽलंकाराणां समुचितं प्रयोगं कृतवान्, तथापि काव्यात्मानं रसमेव स्वीकरोति सः। एवमेव तस्य मतम् अग्निपुराणकारेण प्रभावितं प्रतीयते। अग्निपुराणकारवत् सः अपि काव्ये रसगुणयोः स्थितिमनिवार्यं स्वीकरोति। इत्थं माघः महाकविः सरसां गुणयुक्तां निर्दुष्टां सालंकारां रचनामेव काव्यलक्षणम् स्वीकरोति, अतः निष्कर्षतः तत्काव्यलक्षणमस्ति–

अदोषौ सगुणौ सालंकारौ सरसौ शब्दार्थौ काव्यम्। इति।

माघः स्वमहाकाव्ये रस–छन्दो–लंकार–गुणादीनां समुचितं प्रयोगं कृतवान्। सममेव सः रसध्वनेः भावध्वनेश्च प्रचुरं प्रयोगं कुर्वन् काव्यस्य ध्वनिः (उत्तमम्) मध्यमः (गुणीभूतव्यंग्यकाव्यम्) अधमश्च (चित्रकाव्यम्) इति त्रीन् भेदान् स्वीकरोति। रसेषु शिशुपालवधमहाकाव्यस्य प्रधानः रसः वीररसः वर्तते, शृंगाररसः तदंगमस्ति। वस्तुतः अस्मिन् वीर शृङ्गारयोरद्भुतं मिश्रणं वर्तते। वीररसेन सह शृंगाररसस्य एव योगः तिष्ठति। प्रथमे सर्गे एव श्रीकृष्णस्य उत्साहस्य संकेतो प्राप्यते, तदालम्बनस्य शिशुपालस्य वर्णनमपि कृतं कविना। पंचदशे सर्गे तु शिशुपालस्य कठोरवचनदोषपूर्णव्यवहाराः उद्दीपनविभावाः विद्यन्ते। सप्तदशे सर्गे तदनुभावानां वर्णनं वर्तते। एवमेव माघः स्वमहाकाव्ये वीररसस्य पूर्णामभिव्यक्तिं कारितवान्। पश्यन्तु भवन्तः, वीररसस्य कियत् मनोहारिवर्णनं विद्यते–

**रणेषु तस्य प्रहिताः प्रचेतसा**
**सरोष हुंकारपराङ्मुखीकृताः।**
**प्रहर्तुरेवोरगराजरज्जवो**
**जवेन कण्ठं सभयाः प्रपेदिरे।।**

वस्तुतः तस्य युद्धवर्णनं तु विशुद्धवीरतायाः

परिचायकमस्ति। अष्टादशसर्गेऽपि युद्धवर्णनं वीररसस्य उदाहरणं प्रस्तौति।।[6] संभोगशृंगारवर्णने महाकवेः अधिकारः प्रतीयते।[7] विप्रलम्भशृंगारविषये महाकविः सफलो न दृश्यते। अन्ये रसाः यथा- रौद्ररसः[8] वीभत्सरसः[9], हास्यरसः[10] करुणस्य वत्सलस्य चाद्भुतः समन्वयः।[11] भक्तिभावनायां सः नारदमुखात् श्रीकृष्णस्य निराकाररूपं कीर्तयति।[12]

माघः छन्दसां वैविध्यं प्रदर्श्य छन्दोचयने स्वपटुतां प्रकटितवान्। क्वचित् रसानुकूलं छन्दसां प्रयोगं कृतवान्। प्रथमे सर्गे वंशस्थं, द्वितीये सर्गे अनुष्टुपम्, तृतीयसर्गे उपजातिं, पंचमे सर्गे वसन्ततिलकां, षष्ठे सर्गे च द्रुतविलम्बितं प्रयुक्तवान्। महाकविः सर्गस्य अन्ते छन्दोपरिवर्तनं चकार। चतुर्थे सर्गे तु द्वाविंशतिछन्दसां प्रयोगः शास्त्रलक्षणकाराणां मान्यतानुरूपमस्ति। प्रमुखेभः छन्दोभ्यः व्यतिरिक्तानां औपच्छन्दसिक-पृथ्वी-तोटक-मत्तमयूरादीनां छन्दसां प्रयोगमपि सः कृतवान्। स्रग्विणी इति छन्दसः अन्त्यानुप्रासयुक्तः सुन्दरः प्रयोगः माघस्य शैल्याः अपि समुचितमुदाहरणं प्रस्तौति। भारविणा प्रयुक्ता प्रवर्तिता चालंकारपद्धतिः माघेन स्वीकृता प्रौढ़ीकृता च। एकोनविंशे सर्गे एकाक्षर-द्व्यक्षर- सर्वतोभद्र-मुरजबन्ध-प्रतिलोमयमकानि[13] गोमूत्रि- काबन्धसमुद्गयमकम्[14], अर्धप्रतिलोमयमकम्[15], भारविणा अप्रयुक्तः चक्रबन्धः[16], इत्यादीनां श्रमसाध्यानां चित्रकाव्यानां प्रयोगं सः कृतवान्। द्व्यक्षरपद्यानां तु अत्र संख्या अधिका वर्तते।[17] चित्रकाव्ये मुरजबन्धः[18], अन्यालंकारेषु उपमा[19], अनुप्रासः[20], स्वभावोक्तिः[21], दृष्टान्तः[22], अर्थान्तरन्यासः[23], गुणेषु ओजोगुणः[24], प्रसादगुणः[25] माधुर्यगुणः[26], एवमेव भावसौन्दर्यस्य प्रसादस्य माधुर्यस्य मधुरः समन्वयः[27], माधुर्यस्य यमकस्य लयात्मकतायाः समन्वयः पश्यन्तु भवन्तः।[28]

माघे प्रकृतिचित्रणम्[29], कमनीयकल्पना[30], माघस्य वर्णनकौशलमपूर्वमस्ति। युद्धवर्णने शृंगारस्य उपमा माघेन एव सम्भवा।[31], युद्धवर्णनम्[32], वर्षर्तुवर्णनम्[33] शरदृतोः वर्णनम्[34], प्रभातवर्णनम्[35], प्रभातकालीनस्य निद्रासुखस्य वर्णनम्[36], प्राकृतिकं दृश्यम्[37], सूर्यवर्णनम्[38], यज्ञवर्णनम्[39] द्वारिकायाः समुद्रस्य च वर्णनम्[40] रैवतकपर्वतवर्णनम्[41], आकाशादवतरतः नारदस्य वर्णनम्[42], ग्राम्यजीवन- चित्रणम्[43], जवनिका प्रथायाः वर्णनम्[44], रूपचित्रणम्[45], पदार्थानामायातनिर्यातवर्णनम्[46]। प्राचीनकालीनायाः संगोष्ठ्याः वर्णनम् भवन्तः पश्यन्तु साक्षात् कृतं महाकविना-

**शुद्धमश्रुतिविरोधि बिभ्रतं**
**शास्त्रमुज्ज्वलमवर्णसंकरैः।**
**पुस्तकैः सममसौ गणं मुहुर्वाच्य-**
**मानमशृणोद् द्विजन्मनाम्।।**[47]

चतुर्दशे सर्गे च शिशुपालस्य दूतस्य उभयार्थिका चतुरा उक्तिः।[48] स्थाने स्थाने सुभाषितानि प्राप्यन्ते यथा जीवने दैवपुरुषार्थयोः समन्वयस्य तथैव

काव्यजगति शब्दार्थयोः समानं महत्त्वं विद्यते। समयः एव मनुष्यस्य उत्थानस्य पतनस्य च कारणं विद्यते। माघस्य काव्यशास्त्रीयमहत्ताया: निरूपणम् अस्यां प्रशस्तौ प्राप्यते -

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः।।**

माघस्य उपमासु सामान्यासु एकः श्लोकः अतीव प्रसिद्ध येन माघः घण्टा माघ इति विरुदेन अलंकृतो जातः -

**उदयति विततोर्ध्वरश्मिरज्जावहिम-**
**रूचौ हिमधाम्नि याति चास्तम्।**
**वहति गिरिरयं विलम्बिघण्टाद्वय-**
**परिवारितवारणेन्द्रलीलाम्।।**

माघे अन्याः उपमाः रमणीयाः दृश्यन्ते। एवमेव अर्थगौरवम्। वस्तुतः माघस्य भाषायाम् असाधारणोऽधिकारः आसीत् अतएव पदे पदे तस्य महाकाव्ये पदलालित्यं प्राप्यते। पदमाधुर्य्या सह स्वरमाधुरी अपि प्राप्यते। माघस्य शैली अलंकृता वर्तते। क्वचित् समासबहुलाभाषा क्वचित् गुणसमन्विता, क्वचित् माधुर्यप्रसादाभ्यामुपेता भाषा दृश्यते। भाषायां नूतनाः शब्दाः अपि सर्वत्र प्राप्यन्ते अतएव समीक्षकैः कथितम् यत् नवसर्गगते माघे नवशब्दोऽपि न विद्यते 'मेघे माघे गतं वयः' इति।

इत्थं शिशुपालवधे वर्णितानाम् उपर्युक्तानां रस-छन्दोऽलंकार-रीति-गुण-पदलालित्यादीनां वैचित्र्येण अलंकारनिबद्धवर्णनशैल्याः विस्तृतविवेचनेन च एतत् स्पष्टं भवति यत् माघस्य काव्यशास्त्रीयं ज्ञानं समुद्रवदगाधमासीत्। तस्य शिशुपालवधं काव्यशास्त्रदृष्ट्या एकं रमणीयं पाण्डित्यमयं सर्वांगपूर्णं च महाकाव्यं विद्यते।

संदर्भाः-


1 शिशुपालवधम्,2/86
2 तदेव 2/87
3 तदेव 2/83
4 तदेव 2/74
5 तदेव 1/56
6 तदेव 18/15, 17
7 तदेव 1/61, 2/44, 3/16, 8/69, 10/42, 12/59, 13/40
8 तदेव 18/12
9 तदेव 18/77
10 तदेव 5/7, 12/22, 13/22
11 तदेव 15/87
12 तदेव 1/33, 35
13 तदेव 19/33, 34
14 तदेव 19/58
15 तदेव 19/88
16 तदेव 19/120
17 तदेव 19/66, 84, 86
18 तदेव 18/12
19 तदेव 2/10, 28, 59, 72, 86, 11/40
20 तदेव 6/20
21 तदेव 12/24
22 तदेव 16/25
23 शिशुपालवधम्,1/67,72, 2/13,46, 11/64
24 तदेव 1/75
25 तदेव 3/16
26 तदेव 4/9, 11/19

27 तदेव 4/17
28 तदेव 4/42
29 तदेव 1/4, 5, 4/47, 6/2, 25, 11/64
30 तदेव 4/20
31 तदेव 18/2
32 तदेव 19/75, 20/76
33 तदेव 6/25
34 तदेव 6/44
35 तदेव 11/6, 64
36 तदेव 11/4
37 तदेव 3/30
38 तदेव 11/41, 43
39 तदेव 14/18–52
40 तदेव तृतीयसर्गे
41 तदेव चतुर्थसर्गे
42 तदेव 1/3
43 तदेव एकादशे द्वादशे च सर्गे
44 तदेव 5/17
45 तदेव 1/4
46 तदेव 3/76
47 तदेव 14/37
48 तदेव 16/2
49 तदेव 6/44
50 तदेव 4/20
51 तदेव 1/5, 2/91, 96, 112, 3/8, 4/37, 47, 19/41
52 तदेव 1/67, 2/13, 72, 4/17, 47, 6/44, 9/6, 13, 11/47
53 तदेव 3/78, 4/9, 15, 6/2, 14, 20, 11/64, 15/33
54 तदेव 4/45
55 तदेव 6/16





# सर्वे ममन्थुर्मुदा

❑ प्रो.ताराशंकर शर्मा पाण्डेय:

### माया क्रियातत्परा

विष्णोः सत्ययुगे कदाचिदररे माया क्रियातत्परा
या प्रासावसरा कुतूहलकरी संकल्पयोगात्मका।
सैव भ्रातृसुरासुरान्तरभवां मालिन्यभूतिं परां
सद्यो द्रोहमतिं ससर्ज सततं कौतूहलोत्पादकीम्।।१।।

### युद्धं विदध्युर्मिथः

देवैश्वर्यविभावितानुरतिका मात्सर्यभावान्विताः
काण्डाकाण्डकृतापरापचितिका युद्धं विदध्युर्मिथः।
तस्मात्तान् हि परस्परं युधि रतान् दृष्ट्वा विधाता पुरा।
तेषां निष्कृतिमानसो विधिमतं चक्रे प्रयासं सदा।।२।।

### सर्वे ममन्थुर्मुदा

पुत्राः! सागरमन्थनोद्भवसुधा प्राप्या भवद्भिः समैः
तेनैवामरता भविष्यसमये वः स्याद्धि सम्पादिता।
दिष्ट्या वासुकिनेत्रमन्थरनगं नद्धा गृहीत्वा तथा
सोत्साहं विबुधासुराश्च नियताः सर्वे ममन्थुर्मुदा।।३।।

### श्रीनीलकण्ठोभवत्

प्रादुर्भूतविषं विलोक्य निखिला पूर्वं हतोत्साहिताः
पश्चाद् द्राग् प्रणिपत्य देवदनुजाः शम्भुं शरण्यं गताः।
सन्तुष्टः समवत्सलः पशुपतिर्विश्वासभूमिर्विभुः
क्ष्वेडाऽऽपानमुखः शिवः शिवकरः श्रीनीलकण्ठोभवत्।।४।।

### कुम्भोपलब्ध्यै पुरा

रत्नव्यूहचतुर्दशाप्तिविषये पीयूषकुम्भं वरं
संप्राप्यासुरदेवयोर्मनसि सुज्जाता परश्रेयसी।
तत्पीयूषविभाजने मतिमतोर्जातो द्वयोर्विग्रहो
बाहाबाहवि भीषणः सुरपथे कुम्भोपलब्ध्यै पुरा।।५।।

### नानात्र भूसंगताः

जन्यं द्वादशवासरावधि महद् देवैस्तदा कारितं
तत्कुम्भस्य जयन्तयोगहरणं ज्ञात्वासुराः कोपनाः।
हस्ताहस्ति मृधे जयन्तसहिते देवासुरैर्लोकिताः
तत्कुम्भोच्छलितामृतस्य पृषता नानात्र भूसंगताः।।६।।

### श्रेष्ठद्वयी राजते

शम्भुर्यः सततं हि पीतगरलः तच्छान्तिचिन्तातुरः
शिप्रायां पृषताश्च केपि मिलिताः शम्भोः समीपङ्गताः।
गंगासम्मिलिता हरेः पदरुचः केचिद्धरिद्वारगाः
तेनैवं क्षितिलोकपारनगरी-श्रेष्ठद्वयी राजते।।७।।

### पुण्यात्मभिर्मानवैः

तत्कुम्भामृतबिन्दुभूषितपया गोदावरीसंगमः
भूमौ त्र्यम्बकसन्निधेश्च परमः सिद्धो महाराष्ट्रियः।
सोन्यो नासिककुम्भनामलसितो लोकप्रियः पावनः
सेव्योऽयं कृतपापतापशमनैः पुण्यात्मभिर्मानवैः।।८।।

### ब्राह्मे मुहूर्ते परे

गंगामध्य-सरस्वती-रविसुता-धारासु ये सङ्गताः
ते पीयूषकणाः सुरासुरचरैर्गन्धर्वयक्षैरपि।
दुष्प्राप्याश्च तथापि पुण्यप्रथितैर्भूमौ प्रयागे सदा
प्राप्या आगरितैर्नरैरविरलं ब्राह्मे मुहूर्ते परे।।९।।

### तीर्थावगाहो वरः

स्यादेवं नु शशी रविश्च मकरे दृष्टश्च मेषे गुरुः
नित्यं द्वादशहायनान्तरयुतिः संयोज्यते संगमः।
कुम्भोयं हि प्रयागराजफलितो देवासुरैर्दुर्लभः
तस्माद्भूमिजनैः सजातिनिवहैः तीर्थावगाहो वरः।।१०।।

### यान्ति प्रयागं मुदा

तीर्थस्नानविधानलग्नमनसः पुण्यात्मनः पूरुषाः
ते साकं पितृभिः सुतैश्च विरला यान्ति प्रयागं मुदा।
स्वर्गं यान्ति पितॄन् नयन्ति कृतिनः पारत्रिकं सर्वदा
तस्मात्कुम्भविशेषता विजयते सानातनी संस्कृतिः।।११।।

# माघोऽतिशेते सकलान् कवीन्द्रान्

श्रीकालिदासो ललितोपमो यः
समीक्षितः यः कवितविलासः।
त्रैगुण्यकोषे परमः प्रसिद्धो
माघोतिशेते सकलान् कवीन्द्रान्।।१।।

काव्येऽतिगम्भीरवचोऽर्थसारो
भूतोद्भूतो भारविभारविः सः।
श्रीसिद्धिसम्प्राप्तवशास्तथापि
माघोतिशेते सकलान् कवीन्द्रान्।।२।।

लालित्यपोषे पदपारगामी।
प्रचण्डखण्डोच्छलवाक्प्रतापी
दण्डी प्रकाण्डः कविरस्ति किन्तु
माघोतिशेते सकलान् कवीन्द्रान्।।३।।

औपम्यपूरार्थगभीरचारु-
लालित्यसार्थो वचनैकसूरः।
लक्ष्मीविशिष्टे शिशुपालकाव्ये
माघोतिशेते सकलान् कवीन्द्रान्।।४।।

गीताकथामाध्यमचित्प्रकाशं
ज्ञानं ददौ गोपकुमारबालः।
स नायकोभूच्छिशुपालकाव्ये
माघोतिशेते सकलान् कवीन्द्रान्।।५।।

कृष्णो महाभारतधूर्धरो यो
जगद्गुरुर्यः प्रथितोस्ति लोके।
तदाश्रयं येन कृतं च काव्यम्
माघोतिशेते सकलान् कवीन्द्रान्।।६।।

काव्यं माघेन सृष्टंनवनवविधिभिः सर्गसर्गानुकूलैः
शब्दै रम्यैः प्रसूते मधुरिपुगुणिते माघनाम्ना प्रसिद्धे।
शब्दो नैवावशिष्टो नवकवननवः काव्यसृष्ट्यै प्रसिद्धिः
सृष्टौ नो पृष्ठपादाः पुनरपि रचने साम्प्रतं काव्यकाराः।।७।।

- इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित-
प्रतिनवबाणभट्ट-पण्डितश्रीमोहनलालशर्मपाण्डेयात्मजेन
श्रीकल्लाजी-वैदिकविश्वविद्यालयकुलपतिना प्रोफेसर(डॉ.)
ताराशंकरशर्मपाण्डेयेन प्रणीतं 'माघोतिशेते सकलान्
कवीन्द्रान्' इति 'माघसप्तकं' नामकाव्यं सम्पूर्णम्।


**पत्रस्य स्वामित्वसम्बन्धे अधिकृतं विवरणम्**
**पत्रकम् 4 ( नियम : 8 )**

| | | |
|---|---|---|
| 1. | प्रकाशनस्थानम् | – जयपुरम् |
| 2. | प्रकाशने कालावधिः | – मासिकपत्रम् |
| 3. | मुद्रकस्य नाम | – द्वारा – न्यू जय शिवा प्रिन्टर्स |
| | नागरिकता, संकेतः | – भारतीयः, गोपालबाड़ी, जयपुरम् |
| 4. | प्रकाशकस्य नाम | – माणकचन्दमाहेश्वरी |
| | नागरिकता, संकेतः | – भारतीयः, भारतीभवनम्, बी-15, न्यूकॉलोनी, जयपुरम्। |
| 5. | सम्पादकस्य नाम | – प्रोफेसर श्रीकृष्णशर्मा |
| | नागरिकता, संकेतः | – भारतीयः, भारतीभवनम्, बी-15, न्यूकॉलोनी, जयपुरम्। |
| 6. | पत्रस्य संपत्तेः अधिकारस्वांशभाजां वा जनानां संस्थाया वा नामसंकेतः | – भारतीय-संस्कृत-प्रचार-संस्थान, राजस्थान, जयपुर |

अहं माणकचन्द माहेश्वरी घोषयामि यद् उपरिलिखितं विवरणं मद्विश्वासेन परिज्ञानेन च सत्यमस्ति।
**दिनांक : 01-03-2025**

# पृथुवंशम्

(चतुर्थः सर्गः)

❑ कविसार्वभौम अभिराजराजेन्द्रमिश्रः
पद्मश्रीः

अथ वासवदिक्तटीं श्रय-
त्यपरेद्युश्शतपत्रवल्लभे।
स ददर्श पृथुर्गवीं पुन-
र्बहिरुद्यानचरीं समागताम्।।१।।

महिषीं स विमुच्य निद्रितां
बहिरागत्य तदन्तिकं ययौ।
समुवाच कृताञ्जलिर्नृपो
यदहं त्वां प्रति भूरिदोषकृत्।।२।।

ननु सत्यमजानता मया
न च किंकिं समुदीरितं रुषा।
प्रकृतेः परिदेवनं शुभे!
हृदयोद्वेगकरं नु कारणम्।।३।।

तदमेयदिगश्रुसम्प्लवे
यदवाक्षीत्तृणकल्पको जनः।
नवनीतसुकोमलं नु मे
हृदयं तत्र धरेऽपराध्यति।।४।।

तदहं विनतः क्षमां लघ-
त्वयि याचे तव शेषवाचिकम्।
विधिसम्मतवाचि मे स्पृहा
वसुधानि!प्रचिताऽघमर्षिणी।।५।।

समवेक्ष्य पृथुं व्यथोद्धुरं
हृदि सन्तापनिपाकधर्षितम्।
धरणी श्रवणीयमाधुरी
परिषिक्तां प्रचकाट वाक्सुधाम्।।६।।

शृणु भूप! पुरा हि वेधसा
नवसृष्टिं विलसन्नवग्रहाम्।
अहमप्यमुना विनिर्मिता
गुणकर्मौघमयी प्रकुर्वता।।७।।

रविचन्द्रकुबेरपाशिनः
पवमानाग्नियमान् स्वकर्मणि।
विनियोज्य यथोचितं प्रभो!
करणीयैश्च निजैर्विबोधिताः।।८।।

अथ मामपि पद्मसम्भवः
सदयं प्राह-धरित्रि! वत्सले!
अतिदुष्करमेव जीवनं
भविता ते तदपि प्रमुह्य नो।।९।।

गगने नितरां दिवाकरं परित-
श्चङ्क्रमणं प्रकुर्वती।
भवितासि विनाऽवलम्बनं
पतदुल्कादिभिराहताऽनिशम्।।१०।।

शतलक्षमहीध्रसागरद्रुम-
संघातगुरुत्ववाहिनी।
निचिता जडजङ्गमात्मकैः
पशुमर्त्याण्डजवारिखेचरैः।।११।।

तदलं भिया वसुन्धरे!
परमेशस्स जगत्पतिस्स्वयम्।
भवतीं कृतकृत्यतां नयेत्
समये त्वामवतीर्य मानदः।।१२।।

भवितैव सुगन्धि ते नभो
विविधैरध्वरधूमसञ्चयैः।
सुजला सुफला महस्विनी
भवितासि त्वमहो हरिप्रिये।।१३।।

तव भारहरो हरिर्यदा
निजलीलाभिरलङ्करिष्यति।
सकलाऽपि हि देवमण्डली
धुतवैकुण्ठपदेह वत्स्यति।।१४।।

न मयेह नवग्रहेष्वसे
समधीतोऽन्यतमो वसुन्धरे।
ननु रोहति ते तुलां मनाक्
जगदीशप्रियतामहोत्सवे।।१५।।

हतपक्षतयोऽथ वज्रिणा
गिरयस्सम्प्रति सुस्थिराः कृताः।
परिकम्पभयं न पूर्ववत्
भवती स्वीप्रकृतिं प्रवधाते।।१६।।

ऋषयो मुनयस्तपस्विनः
व्रततीपादपभोगयोनिजाः।
तपसि स्थितवन्त आत्मकृ-
त्तपसा बिभ्रति तेऽपि शेवधिम्।।१७।।

व्रतदानमखादिकर्मभि-
र्दशधा लक्षणधर्मपालनैः।
समुपार्जितपुण्यसञ्चयै-
र्भवतीं धारयति प्रजाजनः।।१८।।

समयोचितभूरिवर्षणै
ऋतसत्यार्यपथानुपालनैः।
वरुणेन्द्रकुबेरसख्यभाक्
भविता त्वं नयधर्मसम्पदा।।१९।।

तपसा बहुदक्षिणैर्मखै-
र्धनदानैः ऋतसत्यसञ्चयैः।
वसुधे! त्वयि वासिनो जनाः
विदधत्येव महीयसीं न किम्!!२०

गगनोल्लिहदेवमन्दिरै-
र्विविधैश्चैत्यरुगातुरालयैः।
पथिकाश्रयकूपवापिका-
मखशालापशुपक्षिनिष्कुटैः।।२१।।

नियतिं तव सात्त्विका जना
द्रढयिष्यन्ति तवायतिं पुनः।
क्षमसे यदि लोकमङ्गलानि
वरीतुं न कृथा व्यथां धरे!!२२

इति सान्त्ववचोभिरञ्चिता
परमेष्ठिप्रवरैः पितामहैः।
अभवं न्वभिमानमेदुरा निज-
दायित्वमुपार्जितुं नृप!!२३

शतशैलदरीगुहागृहैर्गिरिकूटावटपल्लिपक्कणैः।
पुरगोपुरदुर्गमन्दुरागजशालानटरङ्गभृद्गृहैः।।२४।।

चतुरुत्तरषष्टिसंख्यकै-
र्ललितैः क्षेमकरैः कलोच्चयैः।
द्युसदामपि मानसं न किं
बहुधा भूप! ममन्थ निर्भरम्!!२५

सुरगुह्यकसिद्धकिन्नरा-
प्सरसो यक्षदनूजपन्नगाः।
वसुधैकविहारिणोऽभवन्
सहचित्ताः सहरागबन्धनाः।।२६।।

छलिकैर्ननु वेशयोषितां
गृहगीतैश्च सुवासिनीरुतैः।

मुखराऽहमहो निरन्तरं
घनपाठैरभवं त्रयीजुषाम्।।२७।।

स्वनियोगमपूपुरन् समे
ननु वर्णाश्रमधर्मिणो जनाः।
गुणगौरवपूजिता ध्रुवं
वयसा नैव न चापि लिङ्गतः।।२८।।

विकृतिं नु गतं परन्त्वलं
निखिलं तत् विधिनोपकल्पितम्।
मम सन्ततयः स्वयं प्रभो!
समभूवन्नथ पश्यतोहराः।।२९।।

मुषितो मम शेवधिर्महान्
रजतस्वर्णहरिन्मणिव्रतः।
असुरक्षकमौषधं तथा
निशि चौरैर्द्रविणार्थिभिर्हृतम्।।३०।।

सहकारवनी फलैर्नता
क्व पुनः स्वाम्युपयोगपूरणी।
समजो हि समाज एषक-
स्समदर्शि व्यभिचारधर्षितः।।३१।।

पतयोऽपि हि जारतां गता
गणिकात्वञ्च गताः पतिव्रताः।
ननु धर्मतरुर्ममाङ्गणे
स्वयमुन्मूलित एव विव्यथे।।३२।।

तदवेक्ष्य निजां सुदुर्दशां
मयकाऽप्युर्वरता तिरोहिता।
शठशाठ्यमहो नियन्त्रितुं क
इवाऽन्यस्सदुपाय आस मे??३३

यदि मातरमेव जातकाः
नृप! मुष्णन्ति गृहे मलिम्लुचाः?
भविता कियती नु वत्सला
दुरपत्येषु शठेषु साऽनघा??३४

तत एव जनेषु दुःस्थिति-
र्बत दारिद्र्यकथा सनातनी।
ववृते जननाथ! गर्हिता
भवजाऽप्यपि हृदार्तिवर्धिनी।।३५।।

मयि बीजमहो वपन्ति ते
परमेतल्लभते न चाङ्कुरम्।
वनराजिषु कोऽपि हिण्डते
न च कन्दान्वितमूलमश्नुते।।३६।।

फलिनोऽपि न ते द्रुमा
मधौ फलमेकं विटपैर्न बिभ्रति।
उदरस्य वृकाग्निमर्दितुं
तदटाट्यां कुरुते निरर्थिकाम्।।३७।।

क्षुधयोपनतान् मृतेर्मुखे
न च नेक्षे पुरुषाङ्गनाऽर्भकान्।
विदधानि परन्तु किन्त्वहं
स्वजनैर्नासि समे नु भुञ्जते।।३८।।

अथ पापभुजो न केवलं
मनुजा एव प्रजेति संज्ञिताः।
चिरकालत एव भूभुजोऽ-
प्यघलीनाश्च्युतधर्मसाधनाः।।३९।।

विनिवारितनैगमार्चना
उपकारेषु विघातकारिणः।
स्वसमर्चनलुब्धमानसा
न तथाकारिषु चाततायिनः।।४०।।

नृपतेरथ किल्विषात्प्रजा
सहते नारकदुर्दशां प्रभो!

अवगत्य यथायथं भवान्
स्वयमेवास्ति प्रमाणमुत्तमम्।।४१।।

अहमस्मि भवत्सनाथिता
भवतैवार्जितगौरवा पुनः।
ननु ते सदुपायदर्शिनी
कथयिष्यामि हितावहं वचः।।४२।।

पितृकल्प पृथो! प्रजापते!
प्रकृतेश्चेदुपकार इष्यते।
उपकल्प्य तदा हि वत्सकं
कमपि प्रेष्ठजनं प्रदोग्धु माम्।।४३।।

भवतो हि वशंवदा जना
भुवि ये केऽपि भवेयुरुत्तमाः।
ननु तेऽपि दुहन्तु सादरं
तदभीष्टं नृप! दातुमुत्सहे।।४४।।

मयि किन्न तिरोहितं यतो
वसुधानी वसुधाऽस्मि रत्नदा।
अहमस्मि जगन्निवेशिनी
जगदाधारशिलाऽत्मधात्रिका।।४५।।

न मया स्वनिसर्गदोषतः
स्थगितो त्मोर्वरता प्रजेश्वर!
इदमाचरितं नु केवलं मनुजानां
दुरिताऽतिचारतः।।४६।।

मयि सन्ति विभूतयः परा
जगदीशोपनताः परन्तु ताः।
ननु दानपुरस्सरं हि ता
इह भोग्या न बलैर्न लुण्ठनैः।।४७।।

दुहिता भवितुं समुत्सहे
भव दोग्धा भुवनाभिवृद्धये।
भवितास्मि पृथोः सुता न्वहं
खलु पृथ्वीति परां प्रथा गता।।४८।।

विनिवेद्य धरेति मानिनी
परितोषाऽमृतपानहर्षिता।
अपहाय गवीतनुं पुनः
नयनाभ्यामभवद्धयगोचरा।।४९।।

रुचिरं सदुपायकौशलं
स्वयमाख्यातमहो क्षमागवा।
समवाप्य पृथुः स्वकामनाऽ-
क्षयसिद्धिं स दर्श तत्क्षणम्।।५०।।

तस्यां रात्रौ स्वप्रजाक्षेमकामः
शैय्योत्सङ्गे संस्मरन् सौरभेयीम्।
वैन्यो नश्यच्छैलशृङ्गावपातो
गाढस्वापं नो कथञ्चिज्जगाम।।५१।।

भूपाः केऽपि स्वप्रजायज्ञयूपाः
कूपाः केपि ध्वान्तलीनाम्बुरूपाः।।!
जीव्याद् वैन्यः किन्तु लोके स एकः
पृथ्वी जाता हन्त पृथ्वी यदर्थम्।।५२।।

।।इति कविसार्वभौमाभिराजराजेन्द्रमिश्रप्रणीते
पृथुवंशमहाकाव्ये
**पृथ्वीगोदोहनाभिधः** चतुर्थः सर्गः।।

क्रमशः

# स्वतन्त्रतायास्तात्पर्यम्

❑ डॉ. महेशचन्द्रशर्मा गौतमः
(साहित्याकादेम्या पुरस्कृतः)

स्वातन्त्र्यसमरस्यास्मिन् महायज्ञे भारतस्य महिलानामनुष्ठानमपि गुर्वर्थमवित्त। महिला एव क्रान्तिकारिभ्य आश्रयान् व्यशिश्रणन्। वृत्तानां सन्देशानाञ्च प्रापणस्य कार्यमपि महिला एवान्वतिष्ठिपन्। क्रान्तिकारिणां शस्त्रागाराणां सुरक्षाप्येतासामेवाभियोज्यतावर्तिष्ट। एकस्मिन्नवस्कन्दने प्रीतिलतायाः समावेशः नारीणां योगदानस्य महार्थतां साधयति। आङ्ग्लैः सह युध्यमाना एव सामृतत्वमवापत्। क्रान्तिकारिभिः सहास्मिन् यज्ञानुष्ठाने व्यासक्तत्वादासिद्धा कल्पनादत्तमहाभागाऽऽजीवनं कारावासस्य प्रसादमवापत्। विद्यार्थिन्यौ शान्तिघोषमहाभागा सुनीतिचौधरीमहाभागा च मण्डलन्यायाधीशं त्यक्तजीवितं व्यधाताम्। वीनादासमहाभागावर्तिष्टैकैतादृशी वीराङ्गना या दीक्षान्तकार्यक्रमे उपाधिं विश्राणयितुमभ्यागतं राज्यपालमेव त्यक्तजीवितं व्यधात्। क्रान्तिकारिभ्यो भोजनं सुरक्षाञ्च विश्राण्यापि भारतस्य वीराङ्गना मातृभुवः स्वातन्त्र्ययज्ञे व्यासक्तानां सैनिकानां महार्थं साहाय्यमन्वतिष्ठिपन्।

१९२९तमे संवत्सरे दिसम्बरमासस्यैकत्रिंशत्तम्यां तिथौ कांग्रेसदलस्याध्यक्षः पण्डितजवाहरलालनेहरूमहाभागोऽर्धरात्रिसमये रावीनद्यास्तटे भारतस्य स्वतन्त्रतायाः प्रतीकरूपेण त्रिरङ्गध्वजमास्फालयाञ्चकार। १९३०तमे संवत्सरे जनवरीमासस्य षड्विंशतितम्यां तिथौ भारतस्य प्रत्येकं ग्रामे प्रत्येकं नगरे, उपनगरे च जना गृहेषु राष्ट्रध्वजमास्फाल्य देशस्य स्वतन्त्रतायै प्रत्यश्रौषुः।

आङ्ग्लशासनं भारतवासिनो लवणनिर्माणाय नान्वज्ञास्त। नागरिकावज्ञाऽऽन्दोलनस्य प्रतीकरूपेण साबरमत्याश्रमस्य महात्मा डाण्डीत्यभिधेयं स्थानमभिगत्य लवणनिर्माणं करिष्यामीत्यजूघुषत्। १९३०तमे संवत्सरे मार्चमासस्य द्वादश्यां तिथावष्टसप्ततिरनुयायिभिः सह स महात्मा लवणं निर्मातुं शतद्वयमीलानि दूरस्थाय डाण्डीत्यभिधेयाय स्थानाय प्रास्थित। येनापि मार्गेण महात्मा प्रागमद् असंख्या ग्रामीणा नागरिकाः पुरुषा महिलाश्च तमनुजग्मुः। यद्यपि गुजरातराज्येऽवर्तिष्टैषा डाण्डीजनयात्रा तथापि सम्पूर्णं भारतमस्यां यात्रायां समाविष्टमजनि। १९३०तमे संवत्सरेऽप्रैलमासस्य षष्ठ्यां तिथौ महात्मा गांधिमहाभाग आत्मनोऽनुयायिभिः सह लवणनिर्माणं कृत्वाऽऽङ्ग्लशासनं व्यचीचलत्। एतदवर्तिष्ट नागरिकावज्ञाऽऽन्दोलनम्। तदनन्तरन्तु सहस्रशो नागरिकाः, योऽपि यत्राप्यवसरमवापत्, लवणं निर्मायाङ्ग्ल-

शासनस्यादेशमुदलङ्घिषत।

कलकत्तानगरनिगमस्य मेयरेत्यभिधेयोऽध्यक्षो जे एम सेनगुप्तमहाभागो लङ्घितशासनमित्युक्त्वा शासनेन प्रतिषिद्धं क्रान्तिकारिणां साहित्यं जनसम्मर्दसमायुक्ते चतुष्के वाचयित्वाऽऽङ्ग्लानां विधानं व्यत्यक्रमीत्। विदेशादानीताया मदिराया विदेशिवस्त्राणामन्येषाञ्च सर्वेषां विदेशिवस्तूनां परित्यागानन्तरमाङ्ग्लशासनस्य वृत्तीरपि विसृज्य भारतवासिनो नागरिकावज्ञाऽऽन्दोलने समाविष्टा अजनिषत। महात्मगांधिमहाभागो बोधनपत्रं लिखित्वा लवणनिर्माणे प्रतिबन्धमपनेतुं सनिर्बन्धं प्रार्तथत। समकालमेव राजप्रतिनिधिमचीचितद् यद्येवं न क्रियते तदाऽऽत्मनोऽनुयायिभिः सह धरसानामभिगत्य स तत्रस्थां लवणनिर्माणशालामधिकरिष्यते। धरसानां परिगृह्य तत्र वयं स्वयं लवणं निर्मास्यामः। गांधिमहाभागस्य धरसानां प्रति प्रस्थानात् पूर्वमेवाङ्ग्लशासनं तं निगृह्य कारागार आसेधीत्। महात्मनो निग्रहणानन्तरं तैय्यबजीअब्बासमहाभागोऽवर्तिष्ट सत्याग्रहस्य नायकः। आङ्ग्लशासनमब्बासमहाभागमप्यासेधीत्। तदनन्तरं सरोजिनीनायडूमहाभागा सत्याग्रहस्य नेतृत्वं व्यधात्। १९३०तमे संवत्सरे मईमासस्यैकविंशत्यां तिथौ २५०० संख्यकैः स्वयंसेवकैः सह सरोजिनीनायडूमहाभागा धरसानालवणशिल्पशालामवास्कांत्सीत्। अहिंसापूर्णं तदान्दोलनमाङ्ग्लशासनमान्दूदुलत्। अवस्कन्दनात् पूर्वं नायडूमहाभागाऽऽत्मनोऽनुयायिनः समवाय्य तानबाबूबुधत्, 'यद्यपि गांधिमहाभागो भौतिकशरीरेण कारागारे विद्यते तथापि तस्य मनस्त्वत्रैव भवतां सर्वाणि विचेष्टितानि सौक्ष्म्येण निरीक्षते। किमपि भवेत्, न वयं हिंसायाः प्रयोगं करिष्यामः। क्रान्तिश्चिरं जीव्यात्।' इत्युत्क्रोशैर्व्योम व्याप्नुवन्तः स्वयंसेवका लवणभण्डारं प्रति प्रास्थिषत। परितो जलपूर्णया परिखया परिवृतं तल्लवणभण्डारं बन्दूकैर्यष्टिकाभिश्च युक्तैर्नगररक्षिभिः सर्वथा सुरक्षितमवर्तिष्ट।

**टिप्पणी :** चतुष्के – चौराहे पर, बोधनपत्रम् – नोटिस, समवाय्य – एकत्रित करके।

'क्रान्तिश्चिरं जीव्यात्'' इत्युत्क्रोशतः स्वयंसेवकान् लवणभण्डारं प्रत्यागच्छतोऽवलोक्य यष्टिधारिणो नगररक्षिणो यष्टिभिः प्रचण्डमाक्रमिषुः। चतुःशतं संख्यकाः पुलिसकर्मिणो लौहावृतप्रान्ताभिर्यष्टिभिर्देशभक्तानामनावृतेषु शिरःसु प्रहृत्य तान् गम्भीरं परिक्षतान् व्यधुः। दौर्भाग्येणाङ्ग्लैरधिकारिभिरादिष्टा भारतीया एव स्वातन्त्र्यसमरयोद्धृषु निर्दयं प्रहृत्य तान् भूमावपीपतन्। अहिंसाव्रतमाचरन्तः सत्याग्रहिणस्त्वात्मरक्षार्थं बाहूत्थाप्य यष्टिकाप्रहारानवरोद्धुमपि न प्रायतिषत। 'क्रान्तिश्चिरं जीव्यात्', 'जयतु भारतमाता' इत्युत्क्रोशन्तो यष्टिकाप्रहारान् पर्यवतिष्ठमाना अपि ते वीरा

यावदचेतना नाजनिषत तावत् प्रागमन्। अचेतनानां वीराणां देहानन्ये देश-भक्ता उत्थाप्यानैषुः। शीघ्रमेवान्ये देशभक्ताः पुलिसकर्मिणां यष्टिकाः पर्यवस्थातुं लवणभण्डारं प्रति प्रास्थिषत। एते समर्पिता वीराः सुतरामज्ञासत यत् पुलिसबलस्य दण्डप्रहारा नियतमेव तेषां शिरःसु पतिष्यन्ति, गम्भीरं परिक्षताश्च ते भविष्यन्ति, जीवनं पणीकृत्यापि दृढसङ्कल्पशीलास्ते लवणभण्डारं प्रति प्रागमन्। सङ्केतमात्रमेतद्, नात्र पूर्णं याथार्थ्यं वर्णयितुं शक्यते। कल्पनातीतान्यवर्तिषत देशभक्तैः सोढानि कष्टानि।

हिन्दूनां मुस्लिमानाञ्च मध्ये विभाजन-मुद्राव्य शासनस्यावर्तिष्टा-इङ्ग्लशासकानां नीतिः। १९३२तमे संवत्सरेऽगस्तमासस्य षोडश्यां तिथौ रैम्जेमैक्डोनाल्डायोगस्य निर्णयः सम्पूर्णान् भारतवासिन साम्प्रदायिकदृष्ट्या व्यबभाजत्। अस्यानुसारं मुस्लिमधर्मावलम्बिनः सिखधर्मावलम्बिन ईसाईधर्मावलम्बिन-श्चात्मनः प्रतिनिधीन् चित्वा संसदि प्रेषयेयुः। आङ्ग्ला दलित-वर्गस्य प्रजाजनान् मुख्यधारातः पृथक् कृत्वा तेषां प्रतिनिधीन् तेषां मध्यात्तैरेव चयनस्य व्यवस्थां कृत्वा दलितवर्गं सम्पूर्ण-हिन्दूसम्प्रदायस्य प्रजाभ्यः पृथगचीकरन्। तदानीं गांधिमहाभागो यर्वदाकारागारेऽवर्तिष्ट। अस्पृश्यताया अभिशापस्य विरोधी स त्वाप्रथमादिमां विकृतिमामूलादुच्छेत्तुं सनिर्बन्धं प्रायतिष्ट। रैम्जे आयोगस्य व्यवस्थाया अङ्गीकरणानन्तरन्तु दलितवर्गस्य सामान्यवर्गात् स्थायिरूपेण पार्थक्यं व्यवसितमवर्तिष्ट। अवितथमेव गांधि-महाभागो दलितेभ्यः केन्द्रे संसदि राज्येषु परिषत्सु चारक्षणमचीकमत परं रैम्जे आयोगेन प्रस्ताविता पृथक् चयनस्य व्यवस्था न कस्यापि स्वीकार्यावित्त। रैम्जे आयोगस्य निर्णयस्य विरोधे गांधिमहाभागो यर्वदाकारागार एवामरणमनशनव्रतमुपाक्रंस्त। गांधिमहोदयस्यानशनेन प्रवर्तिता नेतारः पूना-संविदामङ्गीचक्रुः। रैम्जे आयोगस्य व्यवस्थानुसारं दलितवर्गेण सम्बद्धानां भारतवासिनां स्वयं दलितानामेव मतैस्तेषां प्रतिनिधीनां चयनस्य प्रक्रिया स्वीकृतावर्तिष्ट परं पूनासंविदानुसारम-वितथमेव केन्द्रे राज्येषु च संसदि परिषत्सु च दलितवर्गायारक्षितानि स्थानान्यवर्धिषत परं तेषां चयनप्रक्रियान्येषामिव सामान्या स्वीकृताभूत्। आङ्ग्ला गांधिमहोदयं कारागारबन्धनान्मुक्तम-कार्षुः। गांधिमहोदयः स्पृश्यास्पृश्यभेदमुन्मूल-यितुं वर्षद्वयं यावद् देशभ्रमणं निरणैषीत्। तस्यैष निर्णयोऽसहयोगान्दोलनस्य गतिं शिथिलीच-कारेति याथार्थ्यं निराकर्तुं न शक्यते परमेतदवर्तिष्ट मात्रं वात्यानां गतिपरिवर्तनम्। नियतमेवान्दोलनमनिरुद्धगति प्रावर्तिष्ट।

- पटियाला, 9781124775

# गगनविहारी *

मूल लेखक : से.रा.यात्री ❑ अनुवादकः डॉ. सत्यव्रत वर्मा

त्वयि चेदेकं रूप्यकं स्यात्, तन्मे देहि। अहं रामदासश्च सुहृदो दाहसंस्कारात् प्रत्यागच्छाव। स दिनद्वयं तस्मिन्नेव गेहेऽतिष्ठत्, भग्नपरिवारस्य सकलां व्यथां च वपुषा मनसा चासहत इत्यहं बाढं वेद। एतद् विचार्यैवाहं तं मया सहाऽऽ नयं यत्तं स्वगृहे भोजनं कारयिष्यामि। रामदासस्य स्वीयं गेहकम् उटजं वा नाऽभूत्, न च स सेवादिना वृत्तिमकल्पयत्। परं तस्य मुक्त (खुला) रूप्यकविषयकं वचस्तदा मे बुद्धिं नारोहत्। मयाऽचिन्ति स धूम्रवर्तिकापूगं क्रेतुमीहते। अहं पाकेटाद् द्विरूप्यकपत्रकं (नोटं) निष्कास्य अब्रवम् – नास्ति मे रूप्यकमेकम्, एतद्द्विरूप्यक-पत्रकमस्ति। एतच्चेद् ग्रहीतुमीहते गृहाण।

आम्, अनेनैव मे कार्यं सेत्स्यति इत्युक्त्वा स पत्रकं (नोटम्) आदत्त, परतः परिक्रम्य चावोचत् - त्वं गृहं याहि, अहमप्यायामि। कालक्षेपं न करिष्ये।

अहं गृहं प्राप्य वस्त्रपरिवर्तनम् अकार्षं जायां तारां चावदम् – तव धर्मभ्राता रामदासोऽचिरेणाऽत्र प्राप्स्यति, तदर्थमपि भोजनं कल्पनीयम्। मम धर्म-भ्राता! भवतोऽपि तेन कश्चित् सम्बन्धः स्यात्? इति सा मां चक्षुषा तिर्यगवलोक्याऽब्रवीत्। कामम् अस्ति। परं तं सम्बन्धं वचसा ब्रुवाणोऽहम् अपशब्दगन्धमनु-भवामि। त्वं च प्रकामं वेत्सि यन् महिलानां पुरतोऽहं सर्वात्मनाऽपशब्दं परिहरामि। तारा किंचिद् वक्तुं प्रावर्तत द्वारे च घण्टिकानिनादोऽजायत। पश्य तव श्यालकमहाशयः प्राप्तः। याहि, द्वारमपावृणु। अहम् आसन्दीत उत्थाय बहिरगमं द्वारं चापावृत्याऽपश्यम् - प्रेतकल्पो रामदासस्तत्र अस्थात्। सोऽन्यथापि दौर्बल्यपरीत आस, श्मशानान्निवृत्य च स सूक्ष्मसूचीवद् अभात्। अहं तम् अकथयम् - स्नानागारं गत्वा हस्तमुखं प्रक्षालय, भोजनं सम्पन्नमस्ति।

'नहि, नहि! भोजनं न करिष्ये, करद्वयं शून्ये भ्रामयन् रामदासः प्राह। कथन्न करिष्यसे' त्वं दिनद्वयं रोहारोटस्य गृहमध्यतिष्ठः। तत्र त्वयाऽन्नकणोऽपि न गृहीतः।

रामदासोऽभाणीत् – सम्यक्। दिनद्वयं किमपि न भुक्तमित्येव बुभुक्षाऽसह्याऽजनि। त्वत्तो रूप्यक-द्वयमादाय सन्निहितं तन्दूरभोजनालयं गतो, रोटिकाद्वयं च तत्र भुक्त्वा तृप्तिसुखमनुभवामि। एतदुक्त्वा स कृपणवद् अहसत्। हसतस्तस्य विरलत्वं गता दन्ता ओष्ठाभ्यां बहिर्निर्गता इवादृश्यन्त। मया कथितम् त्वयैतद् अनुपपन्नं कृतम्। भोजनेऽत्र सुलभे भोजनालये भक्षणं नितराम् अयुक्तमासीत्। अहं तु त्वदर्थं भोजनं पक्तुं तारां पूर्वमेव प्रैरिरम्।

'स्खलितमभूत्। क्षमतां भवान्। भगिनीमपि क्षमां याचिष्ये'।

इतः केषुचिद् वर्षेषु तस्य विवाहच्छेदोऽभूत् तेनैव च तस्य जीवनं विपर्यासम् अगाद् इति मे विदितमासीत्। स निरुद्देश्यं भ्राम्यन् निर्जलो मेघ

---

* हिन्दी कथा, मूलाभिधा 'आकाशचारी'

इवासीत्। तदपि किंचित् परिहासं कुर्वन्नहम् अकथयम् - गार्हस्थ्यं परिकल्पय। एषा तन्दूरकथा स्वयमेव विरंस्यति। स सविषादम् आह- इदानीं पोतः पत्तनं परिहाय सुदूरं गतः, श्रीमन्।

'परं रामदास! जीवितुं कश्चिद् व्यपदेशोऽपीष्यते। व्यपदेशा अत्र बाहुल्येन वर्तन्ते। केवलं सन्दर्भपरिवर्तनं प्रतीक्षे। अहं चण्डातपेऽपि हेलया विहरामि। विहरतश्च मे आतप एवार्थहीनो जायते।

अहं सहासम् अब्रवम् - इदमपि शक्यं यत्त्वं किमपि गन्तव्यं न प्राप्नुयाः, आतपविहार एव च ते नियतिरभवत्। स सपदि प्रत्यवादीत् - आतपः सदैव प्रचण्डः स्यात् न च मान्द्यम् अस्तं वा यायादिति नितरां दुश्शकम्। तस्य मान्द्यमेव तम् (आतपम्) अधरीकरोति। सन्दर्भपरिवर्तनेनैव जीवनं नवमर्थं गृह्णाति। एष परीवर्तो जीवने प्रायेण प्रवर्तते।

अहं मृदु अवदम् - रामदास! त्वमतितरां विकलोऽसि। त्वं किमपि प्रतीक्षितुं नालम्।

स सुतरां श्रान्तोऽभूत् तस्य नेत्रे च जागरणभारेणाऽऽक्रान्ते आस्ताम्, परं मद्वचो निशम्य स एक-पदे सुस्थोऽजायत प्राह च - त्वं यथा चिन्तयसि, मम सर्वमिदं ततो विपरीतमस्ति। प्रतीक्षां परिहाय जीवने मम किमन्यत् करणीयम् अधुना। परमियं मम त्रासदी यन्नाहं तत् सुष्ठु वेद यदहं प्रतीक्षे- यस्याहं प्रतीक्षां करोमि।

तस्य वचसि आर्जवनिनाद आसीत्। धूम्रवर्तिकापूगं तं प्रति कृत्वाऽहमुक्तवान् - कथमिदं सम्भाव्यते?

'नाहं वेद। अहं तु इदमेव चिन्तयामि यत् कदाचिदहं समृद्धतमं जीवनं यापयिष्यामि। अद्य यावन् मज्जीवनं नूनमेव पदातेरिव दीनं हीनं च व्यतीतम्। परं मनसा रोल्सरायसाख्यं यानमारुह्य जगति स्वैरं निर्विघ्नं च भ्रमामि। उत्पत्य च कञ्चित् रमणीकं पार्वतकं जनावासम् (होटलम्) अधिवसामि। इदं चान्यत्, मम शरीरे यानि वस्त्राणि सन्ति तानि परिवर्तयितुं परिधानान्तरमपि मे नास्ति। कदाचित् भोजनं कर्तुम् अष्टौ आणका अपि सुदुर्लभाः। परमनेन किम्? मम समृद्धिर्नियमेनाक्षता वर्तते। सा मनागपि न हीयते।

स्वं वचोऽभिधाय स आसन्दीत उत्थितः पतलूनस्य पकिटाच्च बृहन्तं पत्रनिचयमादाय मे पुरतो निहितवान्। पश्यतु भवान् मम समृद्धेर्वैभवमिति चोक्तवान्। अहं तानि भुग्नानि लॉटरीपत्राणि अद्राक्षम्, अन्यमनस्कतया चाप्राक्षम् - अद्य यावत् कश्चित् पुरस्कारोऽपि लब्धः? स औदार्येणावादीत् - का त्वरा? नावाप्तः परं कदाचित्तु वेत्स्यामि। सपदि च यदि लब्धः स्यात् सर्वं संकुलम् स्यात्। इदानीं मया भूयस्यो योजनाः कल्पिताः सन्ति। पुरस्कारं लब्धये ताः सम्पादयितुं सर्वात्मना यतिष्ये।

अहं परमं विस्मयम् अगाम्। ऊर्ध्वचत्वारिंशद्वर्षोऽप्ययं जनः कस्मिन् कल्पनालोके भ्रमति। अहं तमुपहसितुं साधु न मन्ये। मां प्रत्यभाद् यदस्य जीवनशैलीम् उद्दिश्य विमर्शलवोऽपि निष्ठुरः स्यात्। स यैश्चित्रैः क्रीडनकैः क्रीडति स्म, तत्रेह लोकस्य यथार्थाभिधानं क्रौर्यमेव भवेत्। अहं तस्य शबलं स्वप्नं भङ्क्तुं नाभ्यलषम्।

नक्तं नववादनमासीत्। अहं तं निवेदयितुमैच्छं

निशि त्वमत्रैव तिष्ठेति। मद्वचोऽवमत्य स चेद् गन्तुं प्रवृत्तः स दिवंगतस्य मित्रस्य गृहमतिचिरेण प्राप्स्यति। शरत् प्रवर्तमानाऽऽसीत्। तस्य वपुषि कार्पासकं शर्ट पैंटं च विहायान्यत् किमपि नासीत्। रामदास! त्वं रात्र्यामत्रैव स्वपिहि।

कदापि पुनरायास्यामि। श्वः प्रातर् मया कुत्रापि गन्तव्यम्, रात्रौ वस्त्राणि प्रक्षाल्य प्रसारयिष्यामि। यथासमयं तानि शोक्ष्यन्ति। अनतिचिरं भवतां दर्शनं करिष्यामीत्युदीर्य रामदासः प्रातिष्ठत। अहं तेन सार्धं निरगच्छं तं च चतुष्पथे विसृज्य गृहमागच्छम्। यदाहं गृहं प्रापं ताराऽवदत् – किमिदम्? रामदासः कुत्र गतः? अहं तदर्थमपि भोजनम् अपचम्।

मयाऽभाणि – स त्वत्कृतं भोजनं न ग्रहीष्यति। सोऽधुना महार्घं वैदेशिकं कारमारूढोऽस्ति, कस्मिंश्चित् भव्ये जनावासे (होटले) सम्पन्नतरं डिनरमत्तुं गतः।

'महार्घं वैदेशिकं कारयानम्? तस्य तु भद्रं वस्त्रमपि नास्ति, तारा सविस्मयमाह'।

'किं तस्य वस्त्रैः प्रयोजनम्। तस्य बहूनि लाटरी पत्राणि सन्ति' लॉटरीपत्रैः किं सेत्स्यति, सेदं कथयित्वा गता। अहं चिराय व्यचिन्तयं यद् रामदासः स्वप्नानां व्यापारी अस्ति, मरुमरीचिकायां मृगो वा?

– ७/३४, पुरानी आबादी,
'नामदेव फ्लोर मिल' इत्यस्य समीपे, श्रीगंगानगरम्

*With best compliments from :*

Regd. Office & Works : HAMIRGARH
Distt. BHILWARA-311025 (Raj.)
Tel. : 01482-286102, 03, 05 & 06
E-mail : bhilwara@kanoria.org
Website : www.ainfrastructure.com
CIN : L25191RJ1980PLC002077
GST No.: 08AABCA7493D1ZO

**Kanoria Energy**
**& Infrastructure Limited**

(Formerly Known as A Infrastructure Limited)

MANUFACTURER OF MAZZA AC PIPES KIRTI BRAND

411, IIIrd Floor, Shalimar Complex, Church Road, JAIPUR-302001 (Raj.)
Ph. : 0141-4019691, 2370566 • E-mail : jaipur@kanoria.org

# नेपालस्य अद्भुतं तीर्थस्थलं बूढानीलकण्ठः

❑ शिवराजभट्टः

काठमाण्डौः उपत्यकाः नेपालस्य संघीयराजधानी, सर्वाधिकं जनसंख्यायुक्तं नगरम् सर्वोच्चस्थाने चतुर्दशशत मीटरोर्ध्वं स्थितम् अस्ति। प्रागैतिहासिकनगरस्य स्थापना ई.पू. द्वितीयशताब्द्यां अभवत्। विश्वस्य प्राचीनतमेषु निरन्तरनिवासस्थानेषु एकमस्ति। काठमाण्डौः उपत्यका प्राचीनकालतः द्वार, हर्म्य, संस्कृति, कलाकृति, मठ, मन्दिर, मूर्तिकलादीनां च कृते विश्वप्रसिद्धा सन्ति। एवं रूपेण धार्मिकपुण्यक्षेत्राणां कृते अपि प्रसिद्धमस्ति। पशुपतिनाथः बूढानीलकण्ठः, गुहेश्वरी दक्षिणकाली, वाग्द्वार, महापुण्या वाग्मती नदी इत्यादीनि विविधानि मन्दिराणि नद्यः पौराणिककालादेव प्रसिद्धाः सन्ति। एषामध्ये **बूढानीलकण्ठः** नेपालस्य राजधान्याः काठमाण्डौमण्डले उत्तरदिशि शिवपुरीगिरेः अङ्के काठमाण्डौनगरस्य केन्द्रतः दशकिलोमीटर–दूरे बूढानीलकण्ठः इति नामकस्थाने स्थितं एकम् अद्भुतं प्रसिद्धं तीर्थस्थलमस्ति। पवित्रमन्दिरत्वेन बूढानीलकण्ठः नेपालदेशस्य प्रमुखेषु पर्यटनस्थलेषु एकमस्ति। इदं धार्मिक, सांस्कृतिक, पुरातत्त्व, पर्यटनरूपेण अपि महत्त्वपूर्णं मन्दिरम् अस्ति। बूढानीलकण्ठस्य मन्दिरं न केवलं नेपालदेशे अपितु सम्पूर्णे दक्षिण–एशियाक्षेत्रे अपि भगवतः विष्णोः लोकप्रियेषु मन्दिरेषु एकमस्ति, यत्र क्षीरसागरे शेषनागस्य शय्यायाम् शयानस्य भगवतः अच्युतपुरुषोत्तमविष्णोः जलतडागे मध्यभागे विशालमूर्तिः प्रकाशते। अत्र सनातनाः हिन्दु-धर्मालम्बिनः भगवतः विष्णुरूपेण पूजार्चनञ्च कुर्वन्ति। बौद्धधर्मावलम्बिनः महात्मबुद्धस्य रूपेण तं पश्यन्ति पूजयन्ति च। अत्र भगवान् विष्णुः प्रत्यक्ष-रूपेण तथा भगवान् शिवः अप्रत्यक्षरूपेण उपस्थितौ स्तः। श्रावणमासे शिवपर्वणि सरोवरस्य जलस्य अधः शिवस्य प्रतिमा दृश्यते इति मन्यते। बूढानीलकण्ठस्य उत्तरदिशि स्थितः शिवपुरी पर्वतः वैष्णवक्षेत्रम् अस्ति। पुराकाले नृसिंह- अवतारसमये सज्जनानां संरक्षणार्थाय दुष्टानाम् दमनाय धर्मसंस्थापनार्थाय भगवता नृसिंहेन हिरण्यकशिपुः नामकः दैत्यः। दुष्टराक्षसहिरण्यकश्यपुदैत्यवधानन्तरं भगवान् नृसिंहः एकल एव शिवपुर्या अरण्ये जगाम। नृसिंहम् अन्वेषयन् महाभक्तः प्रह्लादः अपि अत्र आगतः। तदास्मिन् क्षेत्रे भक्तप्रह्लादेन बहुसहस्त्रवर्ष-पर्यन्तं भगवतः नृसिंहस्य नाम जपता तपस्तप्तम्। एवमेव कतिचित् सहस्त्राणि वर्षाणि अतीतानि तदा भगवान् शिवः प्रादुर्भूय प्रह्लादं वरदानं अदात् अवदच्च -

**मृगेन्द्ररूपमास्थाय विष्णुरत्र यतः स्थितः।**
**अतस्तु वैष्णवं क्षेत्रमिदं लोके भविष्यति।**

तस्मात् कारणात्तस्मात् कालात् इदं क्षेत्रं वैष्णवक्षेत्रं मन्यते इति स्कन्दपुराणस्य नेपाल-माहात्म्ये सप्तमे अध्याये व्याख्यातमस्ति।

बूढानीलकण्ठस्य मुख्यद्वारं पीतलेन निर्मितमस्ति यत्र एकस्मिन् द्वारे पार्वतीपुत्रः कार्तिकेयः अपरस्मिन् द्वारे समस्तविघ्नहर्ता गणेशः च चित्रितौ स्तः। तडागस्य मध्यभागे भक्तप्रियभगवतः नारायणस्य प्रतिमा एकया विशालया कृष्णशिलया निर्मिता अस्ति। शेषशय्यायां सुप्तविष्णुप्रतिमायाः दीर्घता पञ्च मीटरमस्ति। भगवतः विष्णोः शिरसि एकादशशिरः शेषनागः छत्ररूपेण वर्तते। भगवतः नारायणस्य शिरः रजतमुकुटेन अलङ्कृतमस्ति। अत्र शेषनागे सुप्तस्य अजाव्ययस्य शङ्खचक्रगदा-धरस्य भगवतः केशवस्य अद्भुता विशालप्रतिमा

स्थापिता अस्ति। एतत्कारणात् बूढानीलकण्ठमन्दिरं सम्पूर्णे विश्वे प्रसिद्धमस्ति। यथा एषा प्रतिमा सम्पूर्ण-विश्वे एका एव अस्ति न कश्चित् अन्यस्थाने एषैव दृश्यते। तस्मात् कारणात् देशदेशतः बहवः सनातनाः हिन्दुधर्मावलम्बिनः भक्तजनाः वैष्णवाः साधुजनाः सन्यासिनः भगवतःजनार्दनस्य दर्शनार्थं पूजार्चन-दानपुण्यार्थं अस्मिन् पुण्यक्षेत्रे आगच्छन्ति। अस्मिन् मन्दिरे केवलं सनातनाः हिन्दुधर्मालम्बिनः एव प्रवेशं प्राप्नुवन्ति न अन्यधर्मावलम्बिनो जनाः।

तत्र नियुक्ताः बटुकाः ब्राह्मणाः पुरोहिताः स्नानं, शृंगारं, श्रीखण्डचन्दनं, केसरं, यवं, तिलं, अक्षतं, पुष्पं, तैलं, धूपं, दीपं, विविधं नैवेद्यादिकम् अर्पयित्वा वैदिकविधिना षोडशोपचारैर्भगवतः बूढानीलकण्ठस्य पूजनमर्चनञ्च नित्यं कुर्वन्ति तथैव त्रिकाले विशेषेण आरार्तिकम् अपि कुर्वन्ति। **नरसिंहपुराणे** यमाष्टकनामके नवमाध्याये अन्तकः यमभटान् कथयति 'हरिगुरु विमुखान् प्रशास्मि मर्त्यान् हरिचरणप्रणतान्नमस्करोमि' यत्र हरिभक्ताः सन्ति तत्र न गन्तव्यं तत्र अहमपि गन्तुं न शक्नोमि 'परिहर मधुसूदनप्रपन्नान्'। एवमेव अन्यपुराणेषु अपि भगवतः विष्णोः पूजनात् सर्वपापविनिर्मुक्तः सर्वभूषणभूषितः काञ्चनेन विमानेन विष्णुलोको महीयते इति विष्णोः पूजनविषये व्याख्यातमस्ति। तस्मात कारणात् श्रद्धावन्तः भक्तजनाः प्रतिदिनं दर्शनार्थं अत्र आगच्छन्ति। एवं प्रकारेण श्रावणमासे हरिशयनी-एकादशी-दिने, हरिबोधनी-एकादशी-दिने देशदेशतः धार्मिकाः सनातनहिन्दुधर्मावलम्बिनः सन्तजनाः सन्यासिजनाः बूढानीलकण्ठमन्दिरे च लक्षशः भक्ताः शङ्खचक्रगदाधरभगवतः गोविन्दस्य विशालरूपस्य दर्शनार्थं दानपुण्यार्थमत्र आगच्छन्ति विशालमेला च लगति। तस्मिन् समये भक्तजनाः भगवतः जगन्नाथस्य विशेषं आराधनं जपदानध्यान-पूजनमर्चनमित्यादि कार्यं च कुर्वन्ति।

भगवतः बूढानीलकण्ठस्य प्रतिमा अतीव पुरातनी अस्ति। कदा केन निर्मिता इति विषये स्पष्टं प्रमाणं नास्ति न कोऽपि जानाति। परन्तु अस्मिन् विषये केचन वदन्ति **सप्तमशताब्दे** नेपालस्य काठमाण्डौः राज्यस्य **महाराजसमुद्रगुप्तः** इति नाम्नो वैष्णवस्य शासनकाले क्षीरसागरे शयितस्य भगवतः पुण्डरीकाक्षस्य शेषनागे शयाना एका अतीव विशाला मूर्तिः निर्माय तडागे स्थापिता। कालान्तरे एषा प्रतिमा विलुप्ता बभूव। ततः बहुशताब्दपश्चात् मल्लवंशस्य काले एकः कृषकः स्वकेदारात् पुनः एतां मूर्तिं प्राप। कृषकस्य खननसमये प्रतिमायाः पादाङ्गुष्ठे क्षतिः जाता, रक्तमपि निस्सृतम्। तदा तस्मिन् स्थाने उत्खननं कृत्वा पुनः तडागं निर्माय पुनरपि मूर्तेः पूजनार्चन-मारम्भं अभवत् । अन्ये केचन, देवमाला वंशीय-महाराज-ऋषभदेवेन बूढानीलकण्ठस्य स्थापना कृता- इति अपि वदन्ति। परन्तु ऋषभदेव प्रतिमा विषये कदा कथम् भूमौ लब्धा वा शिल्पिना निर्मिता इति स्पष्टतया लिखित इतिहासः नास्ति।

सप्तदशाब्दे राजा **प्रतापमल्लः** हनुमानढोका-नामक- प्रासादस्य समीपे चतुष्कोणनामकस्थाने बूढानीलकण्ठस्य एतत् भव्यं विग्रहं स्थानान्तरितं कृत्वा स्थापयितुं ऐच्छत् तदा एषा प्रतिमा स्वप्ने तं राजानम् अवदत् 'माम् कुत्रापि न चालयतु न नयतु' इति। भवतः उत्तराधिकारिणः च एनां प्रतिमाम् अपि न पश्यन्तु अन्यथा अशुभं भविष्यति इति शापकारणात् नेपालस्य राजपरिवारस्य सदस्याः अस्मिन् मन्दिरे दर्शनं कर्तुं न शक्नुवन्ति। यः अस्मिन् मन्दिरे गत्वा दर्शनं करोति तस्य मृत्युर्भवति इति दृढं विश्वसन्ति जनाः।

- सूचनाप्रविधिनिर्देशकः
**नेपाल**-सर्वकारः
नापी-विभागः, मीन-भवनम्, **काठमाण्डौः**।

# कन्यकाजन्मव्यापारकष्टेन किम् ?

❑ प्रीतिपुजारा:

श्रूयतां प्रार्थनां हे जगल्लोचनम्!
राजतादाधिपत्यं नृणां केवलम्।
जातिनाम्न्यद्य स्त्री भूतलात् नश्यतात्
कन्यकाजन्मव्यापारकष्टेन किम्?।।१।।

निर्भया मौमिता कथ्यतां वा कति-
व्याधकैर्बद्धपाशा हता वत्सला।
खट्टिका जृम्भिता कौणपा: प्रीणिता:
कन्यकाजन्मव्यापारकष्टेन किम्?।।२।।

कोकिला प्राङ्गणे नृत्यमाणा पुरा
गानहीनाऽधुना शोकसन्तापिता।
अम्बरीषो विषाक्तो धराऽनुर्वरा
कन्यकाजन्मव्यापारकष्टेन किम्?।।३।।

रक्ष्यते यस्य देशे न नारी यदा
पीडिता यत्र शक्तिस्स्वयमम्बिका।
खण्डितो नारीसम्मानभावो यदा
कन्यकाजन्मव्यापारकष्टेन किम्?।।४।।

कन्यकारक्षणं नेतृणां भाषणे
मन्त्रगानं यथाऽऽचर्यते उत्सवे।
राक्षसो लुञ्च्यमानस्तु मोमुच्यते
कन्यकाजन्मव्यापारकष्टेन किम्?।।५।।

नश्यतादाभिजात्यं समस्तं प्रभो!
रूपसौन्दर्यमाधुर्यराशि: पुन:।
मञ्जुलो नूपुरस्य ध्वनिर्नश्यता-
दाशु यान्तु क्षयं प्रेममूर्तिप्रभा:।।६।।

नीडसुप्ता खगी नश्यतात् सुन्दरी
नश्यतात् पर्वतं लालयन्ती नदी।
प्रेममूर्तिस्तथा मातृशक्तिस्सदा
नश्यतात् वैखरी स्निग्धभावान्विता।।७।।

तिष्ठतात् भूतले तुङ्गतुङ्गो गिरि:
लीलया सञ्चरन्त्वद्य व्याघ्रादय:।
नर्तकी मेनका लुप्यतात् सर्वथा
निर्जीव: स्थाणुरेको शतायुर्भवेत्।।८।।

निर्मितव्या त्वया स्त्रीविहीना धरा
चालनीयं नरैर्भूमिराज्यं प्रभो!
नूनमाचर्यतां भो! प्रयोगो नव:
कन्यकाजन्मव्यापारकष्टेन किम्?।।९।।

स्यात् कदा कन्यकाजन्मने ते रुचि:
दीयतां कन्यकाहस्तके केवलम्।
जन्मत: तीक्ष्णधारं निषङ्गं प्रभो!
चण्डिका सा स्वयं राक्षसं पातयेत्।।१०।।

# स्वास्थ्य-संरक्षणम्

❑ डॉ. पवनकुमारशर्मा

अस्माकं देशे मानवानां स्वास्थ्यं निरन्तरम् अधोगच्छति। मूर्खता, दरिद्रता, रुग्णता च मनुष्याणां प्रबलाः शत्रवः सन्ति। स्त्रीपुरुषाणां शरीरपरिमाणे, बले, वयसि, चिन्तने च पूर्वापेक्षया अल्पता एव एधमाना दृश्यते। प्रतिदिनम् आकाशवाणीदूरदर्शनाभ्यां स्वास्थ्यसंरक्षणार्थं सूचना प्रसार्यते। विश्वस्वास्थ्यसंघटनम् अपि स्वास्थ्यरक्षणाय निर्धनानां देशानां यथाशक्ति साहाय्यं करोति।

कः स्वस्थः भवति इत्यस्मिन् विषये चिकित्सकाः वदन्ति यत् यस्य पुरुषस्य दोषाः अग्नयः समाः, धातूनां मलानां च क्रियाः समाः, यस्य शरीरम् इन्द्रियाणि चेतांसि च प्रसन्नानि चिन्तारहितानि च भवन्ति स पुरुषः स्वस्थो भवति।

**समदोषः समाग्निश्चः समधातुमलक्रियः।**
**प्रसन्नात्मेन्द्रियमनः स्वस्थ इत्यभिधीयते।।**

सम्प्रति अस्माकं देशे स्वास्थ्यक्षयस्य बहूनि कारणानि सन्ति। तेषु प्रमुखानि कारणानि इमानि सन्ति-जनसंख्यावृद्धिः, अनियमितजीवनशैली, पोषकतत्त्वहीनं भोजनम्, खाद्यपदार्थेषु मिश्रणम्, मादक-द्रव्यानां सेवनम्, नैतिकतायाः ह्रासः, सदाचारहीनता, कुसङ्गतिश्च।

बुद्धिमताम् श्रमिकाणाम् व्यवसायिनाम् शिक्षकाणाम्, छात्राणाम्, कृषकाणाम्, नारीणाम् अन्येषां सर्वेषां च शरीरं मनश्च क्षीयमाणमस्ति। जनानां शरीरं श्रमक्षमाहीनं मुखमण्डलं श्रीहीनं नेत्राणि प्रकाशरहितानि चित्तञ्च धैर्यहीनं सञ्जातम्। पञ्चप्रतिशतं जनाः स्वास्थ्यश्रेण्यां भविष्यन्ति। इदानीं स्वतन्त्रेऽपि अस्माकं देशे देशवासिनां कृते निवासस्य स्वस्च्छता, सूर्यस्य प्रभा, शुद्धमन्नं जलञ्च न सन्ति।

अस्माकं देशेस्य ऋषयः महर्षयश्च चिरञ्जीविनोऽभूवन्। ते प्रातः उत्थाय शौचम्, दन्तधावनम्, स्नानञ्च कृत्वा ध्यानं कुर्वन्ति स्म। ऋतुकालानुसारं कन्द-मूल-फलानि असेवन्त। तेषामियं कामना आसीत् यत् अस्यां भूमौ जनाः तेजस्विनः निर्भयाः अतिथिप्रियाश्च भवन्तु। स्वास्थ्य-संरक्षणार्थं सर्वदा शरीर-चित्तयोः शुद्धीकरणं भवेत्। अस्माकं स्व-जीवनं सामाजिकजीवनं च स्वस्थं भवेत्। परिवारे च पितरौ, भ्रातरः, पुत्राः, पुत्र्यश्च प्रसन्नाः स्युः।

स्वास्थ्य-रक्षायै सन्तुलितं भोजनमपि आवश्यकमस्ति। स्वास्थ्यवर्धनाय जनाः कदापि धूम्रपानसेवनम्, मद्यपानम्, तमाल-पत्रसेवनं न कुर्वन्ति। एतादृशाः जनाः स्वस्थाः दीर्घजीविनः राष्ट्रभक्ताश्च भवन्ति। उक्तञ्च स्वास्थ्यविषये- 'शरीरमाद्यं खलु धर्मसाधनम्' इति।

- विद्या संबल- सहायकाचार्यः संस्कृते,
सेठ बुधमल दुगड़ राजकीय महाविद्यालयः,
सरदारशहर (चूरू) राज.

# वेदस्य परिचयः

❑ संजयशर्मा

सनातनधर्मस्य मूलग्रन्थः वेदः । भारतीय-संस्कृतेरितिहासे वेदानां नितान्तं महत्त्वपूर्णं गौरवपूर्णञ्च स्थानमस्ति । संस्कृते वेदशब्दस्यार्थः ज्ञानमस्ति, यतो ह्ययं शब्दः ज्ञानार्थक - विद् धातोः निष्पद्यते। केषाञ्चिद् विदुषां मते 'वेद'शब्दः अलौकिकज्ञानवाचकः। इदमलौकिकं ज्ञानमिष्ट-प्राप्तिस्तथा चानिष्टपरिहारः अस्ति। यतो धर्मज्ञानमवाप्यते स वेदः ।

'इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकोपायं यः वेदयति सः वेदः'[1] इति वेदार्थप्रकाशकेषु अग्रगण्यैः सायणाचार्यैः स्वकीयभाष्ये वेदशब्दस्य निर्वचनमुक्तम्। एतादृशः न कोऽप्यस्ति अलौकिकोपायबोधकः वेदादृते। सोऽयं वेदः प्रकाशयन् सर्वज्ञं तत्परं ब्रह्म, तद्वस्तुतत्त्वमपि समर्थयति। वेदानामुपलब्धिः ऋषिमुखेनैव अस्माकं भवितुमर्हति। एवं च ब्रह्मणि सर्वहवनरूपेण आत्मयज्ञेन तपसा आविर्भूतस्वरूपाणाम् ऋषीणां ब्रह्मभावसम्पत्त्या समाधौ प्रत्यग्दृशैव तत्तादृशं वेददर्शनं भवितुमर्हति। ऋषिमुखेन इतरे जनाः लब्धवन्तः । एतेन अतीन्द्रियद्रष्टारः ऋषयः तपसा यमर्थमनुदृश्य तदर्थावबोधिनीं छन्दोनिबद्धसहितां वाचम् अनुश्रावयन्ति, स एव वेदो भवतीत्यर्थः सम्पद्यते ।

**वेदः** -धर्मप्रमाणेषु श्रुतेः प्राथम्यं प्राधान्यञ्चेति सर्वैः स्वीक्रियते ।प्रसङ्गेऽस्मिन् भगवता मनुना उक्तं यत् -

**अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते ।**
**धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।।** [2]

वेदेषु ये नियमाः प्रतिपादिताः सन्ति तेषामाधारेण स्मृतिषु धर्मसूत्रेषु च नियमाः वर्णिताः सन्ति। वस्तुतः ये नियमाः स्मृतिषु धर्मसूत्रेषु च सन्ति, तेषां मूलं वेदान्तर्गतब्राह्मणग्रन्था एव। पुनश्च 'वेदो धर्ममूलमिति'[3] गौतमवचनात् 'वेदोऽखिलो धर्ममूलमिति'[4] मनुवचनात् च धर्मविषये मूलं परमं प्रमाणं च वेद एव इत्यत्र नास्ति कोऽपि संशयः।

**ऋग्वेदस्य शाखाः** - ऋग्वेदो ज्ञानकाण्डमस्ति। ऋग्वेदो विश्वसाहित्यस्य प्राचीनतमो ग्रन्थोऽस्ति । भाष्यकार- पतञ्जलिमतानुसारम् ऋग्वेदस्य एकविंशतिः शाखाः सन्ति ।परन्तु साम्प्रतिककाले -

1. शाकलशाखा
2. बाष्कलशाखा
3. आश्वलायनशाखा
4. शांखायनशाखा
5. मण्डूकायनशाखा

एते पञ्चैव शाखाः प्रसिद्धास्सन्ति ।

**१. शाकलशाखा** - सम्प्रति प्रचलिता ऋग्वेदस्य संहिता शाकलशाखीया एव वर्तते। अस्याः संहितायाः अन्ते ऋक् परिशिष्ट नाम्ना संगृहीतानि षट्त्रिंशत् ३६ संख्याकानि सूक्तानि सन्ति। एतेषु सूक्तेषु कानिचित् सूक्तानि अतीव प्रख्यातानि सन्ति । यथा श्रीसूक्तम्, रात्रिसूक्तम्, मेधासूक्तम्, शिवसङ्कल्पसूक्तञ्चेति। शाकलशाखायां सप्तदशाधिकानि सहस्रसंख्याकानि १०१७ सूक्तानि सन्ति।

**2. बाष्कलशाखा** - यद्यपि सम्प्रति बाष्कलशाखा-संहितायाः अध्यापनं न भवति। तथाऽपि अस्याः शाखायाः विशिष्टं वर्णनं समुपलभ्यते। ऋक्परिशिष्टस्यान्तिम-सूक्ते अन्तिममन्त्ररूपेणैवमृक् समुपलभ्यते। अस्मादेव सूक्तात् बाष्कलशाखा संहितायाः समाप्तिः भवति। बाष्कलशाखानुसारेण पञ्चविंशत्युत्तर-सहस्रसंख्याकानि १०२५ सूक्तानि

ऋग्वेदे सन्ति।

**3. आश्वलायनशाखा** – साम्प्रतमस्याः शाखायाः अध्ययनं न हि जायते। परन्तु आसीत् कश्चन कालविशेषः यदस्याः शाखायाः ऋक्संहितासीत् यतः १७ शताब्दस्य कवीन्द्राचार्यस्य सूच्यामस्य ग्रन्थस्य नाम स्पष्टरूपेण समुपलभ्यते। किन्तु अधुना अस्याः शाखायाः गृह्यसूत्रश्रौतसूत्रे समुपलभ्येते।

**4. शाङ्ख्यायनशाखा** – साम्प्रतम् अस्याः शाखायाः ब्राह्मणारण्यक-ग्रन्थौ प्रकाशितौ स्तः। बहूनां समालोचकानां मतानुसारेण शाङ्खायनशाखा कौषीतकीशाखेति ऋग्वेदस्यैकस्या एव शाखायाः नामद्वयं वर्तते।

**5. माण्डूकायनशाखा** – अस्याः अपि शाखायाः उपलब्धिर्नहि जायते। किन्तु तत्र अस्याः शाखायाः ग्रन्थानाम् उद्धरणमात्रमवेक्ष्य शाखायाः अनुमानं क्रियते।

**यजुर्वेदस्य परिचयः**

यजूंषि गद्यानि, अध्वर्युणा यज्ञे उपयुज्यमाना मन्त्रा एवात्र यजुर्वेदे संकलिताः। कृष्णयजुः, शुक्लयजुः इति द्विप्रकारकेषु १९५७ मन्त्राः सन्ति, येषु अग्निचयनम्, उखाभरमम्, चितयः, रुद्रहः, शतरुद्रियम्, सोमसम्पादनविधिः इत्यादीनि विषयवस्तूनि सन्ति। यजुर्वेदे कृष्णयजुः, शुक्लयजुः।

**कृष्णयजुः** तैत्तिरीयशाखा (संहिता) – अत्र ७ काण्डाः, ४४ प्रपाठकाः, ६३१ अनुवाकाश्च सन्ति। मैत्रायणीशाखा (संहिता) – अत्र ४ काण्डाः, ५४ प्रपाठकाः, २१४४ मन्त्राः सन्ति। काठकशाखा (संहिता) – अत्र ४० स्थानकाः, ८४३ अनुवाकाः, ३०९१ मन्त्राः सन्ति। कपिष्ठलकठसंहिता – अत्र ६ अष्टकाः ४८ अध्यायाः सन्ति।

**शुक्लयजुः** – माध्यन्दिनशाखा अथवा वाजसनेयि संहिता – अत्र ४० अध्यायाः, १९७५ मन्त्राः सन्ति।

काण्वशाखा – अत्र ४० अध्यायाः, २०८६ मन्त्राः सन्ति। पुनः ब्राह्मणः त्रिधा विभज्यते। ब्राह्मणः – शतपथब्राह्मणः, तैत्तिरीयब्राह्मणः।

आरण्यकम् – बृहद् आरण्यकम्। उपनिषद् – बृहद् आरण्यकोपनिषद्, ईशोपनिषद्। यजुर्वेदे ४० अध्यायाः सन्ति। १३०३ अनुवाकाः १९७५ मन्त्राश्च सन्ति। अस्य वेदस्य ऋत्विक् अध्वर्युः विद्यते।

**सामवेदस्य परिचयः** – यज्ञे चत्वार ऋत्विजो भवन्ति – होता, अध्वर्युः, उद्गाता, ब्रह्मा। होता – आह्वानकर्ता, स हि यज्ञावसरे प्रकान्तदेवतानां प्रशंसायां रचितान् मन्त्रान् उच्चारयन् देवता आह्वयति। उच्चस्वरेण गानकर्ता, स्वरबद्धान् मन्त्रानुच्चैर्गायति, तदपेक्षितो मन्त्रसंग्रहः सामवेदः। सामवेदस्य गानप्रचुरता प्रार्थिता। सामवेदे १५४९ मन्त्राः सन्ति। सामवेदगतमन्त्राणां सप्तस्वराः यतस्ते गीयन्ते। पूर्वार्चिकमेव छन्दः, छन्दसी, छन्दसिका चेति त्रिभिरपि नामभिरभिधीयते। उत्तरार्चिकन्तु अनुष्ठाननिर्देशकम्। सामवेदे पूर्वार्चिकम्, उत्तरार्चिकम्।

**पूर्वार्चिकम्** –

आग्नेयपर्व, ऐन्द्रपर्व, पवमानपर्व, आरण्यकपर्व च।

**उतरार्चिकम्** –

दशरात्रम्, संवत्सरम्, ऐकाहम् च।

पुनः ब्राह्मणः त्रिधा विभज्यते। ब्राह्मणः –

ताण्ड्यः, षड्विंशः, सामविधानम्, जैमनीयम् च।

**आरण्यकम्** –

छान्दोग्यम्, तवल्कारः च।

**उपनिषद्** –

छान्दोग्यम्, केनोपनिषद् च।

सामवेदे १५४९ मन्त्राः सन्ति। अस्य वेदस्य ऋत्विक् उद्गाता ।

पूर्वार्चिकमेव छन्दः, छन्दसी, उदसिका चेति त्रिभिरपि नामभिरभिधीयते । विषयानुसारं पूर्वार्चिकं चतुर्षु भागेषु विभज्यते –

आग्नेयपर्व, ऐन्द्रपर्व, पवमानपर्व, आरण्यकपर्व च।

'महानाम्नी' आर्चिकश्चास्ति। अत्र षड् अध्यायाः ६५० मन्त्राः।

उत्तरार्चिकं तु अनुष्ठाननिर्देशकम्। तस्य बहवो विभागाः सन्ति। उत्तरार्चिके २१ अध्यायाः अथवा ९ प्रपाठकाः, १२२५ मन्त्राः सन्ति । तेषु प्रमुखाः भेदाः यथा – दशरात्रम्, संवत्सरम्, ऐकाहम्, अहीनम्, सत्रम्, प्रायश्चित्तम्, क्षुद्रम् च।

अस्यां संहितायां १८७५ ऋचः प्राप्यन्ते। सम्प्रति सामवेदसंहितायाः तिस्र एव शाखाः समुपलभ्यन्ते – कौथुमीयशाखा, राणायनीयशाखा, जैमिनीयशाखा च।

**सामवेदस्य ब्राह्मणग्रन्थाः –**

पञ्चविंशः, षड्विंशः, सामविधानब्राह्मणः, आर्षेयब्राह्मणः। मन्त्रब्राह्मणः, देवताध्याय-ब्राह्मणः, वंशब्राह्मणः, संहितोपनिषद्ब्राह्मणः, जैमिनीयब्राह्मणः, जैमिनीयतवलकारब्राह्मणः, जैमिनीयोपनिषद्-ब्राह्मणः। सामवेदस्यारण्यकग्रन्थो नास्ति।

**अथर्ववेदस्य परिचयः**

अभिचारक्रियायाः प्राधान्येन प्रतिपादकोऽयं वेदः अथर्वनामकर्षिणा दृष्टत्वात् अथर्ववेद इत्युच्यते। अस्मिन् वेदे ५९८७ मन्त्राः विद्यन्ते। अथर्ववेदस्य ९ शाखा आसन्, परं सम्प्रति शौनकीय-पैप्पलाद द्वे एव शाखा प्राप्येते ।

**अथर्ववेदे शाखा –**

शौनकशाखा, पिप्पलादशाखा च।

पुनः ब्राह्मणः त्रिधा विभज्यते ।

**ब्राह्मणः** – गोपथब्राह्मणम्।

**आरण्यकम्** – शून्यम्

**उपनिषद्** – प्रश्नः, माण्डूक्यः, मुण्डकः।

अथर्ववेदे २० काण्डानि, ७३१ सूक्तानि, २९८७ मन्त्राः च विद्यन्ते । अस्य वेदस्य ऋत्विक् ब्रह्मा विद्यते।

अथर्ववेदस्य उपलब्धेषु अनेकाभिधानेषु अथर्ववेद, ब्रह्मवेद-अंगिरोवेद-अथर्वांगिरोवेदादीनि नामानि प्रमुखतां भजन्ते। 'थर्व' धातुः कौटिल्यार्थकः तथा हिंसावाचकः अस्ति। अत एव 'अथर्व' शब्दस्य अर्थोऽस्ति यत् अकुटिलवृत्त्या अहिंसावृत्त्या च मनसः स्थैर्यप्रापकर्ता। अथर्वांगिरसव्याख्याकरणे सति प्रतीयते यत् ऋषिद्वयेन दृष्टानां मन्त्राणां समूहरूप एव अथर्ववेदः। अथर्वदृष्टा मन्त्राः शान्तिपुष्टिकर्म-युक्ताः सन्ति, परन्तु अंगिरोदृष्टा मन्त्राः आभिचारकाः सन्ति। वेदेऽस्मिन् मारणमोहनोच्चाटनादीनां ज्वरा-पस्मारादिरोगविनाशकानाञ्च मन्त्राणां संग्रहोऽस्ति। अत्र २० काण्डानि, ३४ प्रपाठकाः, १११ अनुवाकाः, ७३७ सूक्तानि, ५९८७ मन्त्राश्च सन्ति। सम्प्रति अथर्ववेदस्य द्वे एव शाखे समुपलभ्येते –

– शोधच्छात्रः, वेदविभागे, जरारासंविवि, जयपुरम्

**सन्दर्भाः**

१. सं.नि.म. – पृ. १

२. मनुस्मृतिः – २.१३

३. गौतमधर्मसूत्रम्, – १.१.१

४. मनुस्मृतिः – २.६

# 'स्फायन्' इति प्रयोगस्य साधुत्वम्

❑ ऐश्वर्या

'चक्षिङ्' धातुः अदादौ आत्मनेपदिषु पठितः। धातुरयं 'व्यक्तायां वाचि दर्शने च' वर्तते। अस्य ङकारः इकारश्च इत्सञ्ज्ञकौ। तत्र इकारः अनुदात्तः पठितः। तस्य 'अनुदात्तङित आत्मनेपदम्'[1] इति आत्मनेपदं तु न तत्प्रयोजनम्, ङित्करणेनैव आत्मनेपदसिद्धेः। तर्हि अनुदात्तेतः इकारस्य कुतो ग्रहणमिति चेत्, 'इकारोऽनुदात्तः युजर्थः'[2] इति तत्फलम् उच्यते। 'अनुदात्तेतश्च हलादेः'[3] इति सूत्रेण युज्विधानाय इकारः अनुदात्तः पठ्यते, येन **'विचक्षणः प्रथयन्'** इति ऋग्वेदप्रयोगः सिद्ध्यति इत्याशयः। तर्हि अनुदात्तेत्त्वादेव आत्मनेपदं सिद्धमित्यतः ङित्करणं व्यर्थं सत् 'अनुदात्तेत्व-लक्षणमात्मनेपदमनित्यम्' इति **ज्ञापयति**। ततश्च अनुदात्तेतः अपि स्फायीधातोः लटि, तस्य शत्रादेशः सिद्ध्यति।

**दीक्षितमतम्**- चक्षिङ्धातोः इकारङकारौ इत्संज्ञकौ। तत्र इकारस्य अनुदात्तत्वात् अस्माद्धातोः ल्युडपवादतया युच्प्रत्ययः सिद्ध्यति (ल्युटि रूपसिद्धावपि लित्स्वरप्रसङ्गः)। अस्य धातोः इदित्वेऽपि 'इदितो नुम् धातोः'[4] इति सूत्रे 'गोः पादान्ते'[5] इति सूत्रात् अन्ते इत्यस्य अनुवर्तनात् अन्तेदित्वं नास्तीत्यतः नुमागमो न भवति। यद्वा, 'इदितः' इत्यत्र कर्मधारयम् आश्रित्य तेन धातुः विशेष्यते। ततः तदन्तविधौ इदिदन्तस्य धातोः नुमागमः इति व्याख्यानात् चक्षिङ्धातोः नुमापत्तिः नास्ति। यद्येवं युजेव प्रयोजनं तर्हि अनुदात्तः इकारः एव कुतः पठितः? अकारस्य पाठः शक्यः खलु इति चेत्, अकारपाठे तु उच्चारणार्थत्वशङ्का उदीयादिति हेतोः स्पष्टप्रतिपत्तये इकारपाठः। इत्थमयं धातुः अनुदात्तेदिति स्पष्टं भवति।

युजर्थं कृतेन अनुदात्तेत्त्वेनैव आत्मनेपदमपि सिद्ध्यतीत्यतः आत्मनेपदार्थं कृतं ङित्करणं व्यर्थं स्यात्। तद् व्यर्थीभूय **ज्ञापयति** 'अनुदात्तेत्वप्रयुक्त-मात्मनेपदमनित्यम्' इति। ननु अन्तेदित्वं वारयितुं ङित्करणं स्यादिति न तस्य वैयर्थ्यम्, तथा च एतमर्थं ज्ञापयितुं ङित्करणम् असमर्थमिति चेत्तत्राह **बृहच्छब्दरत्नकारः** 'अन्यानुबन्धे कर्तव्ये पञ्चम-सन्दिग्धानुबन्धकरणसामर्थ्येन ज्ञापकस्य सुस्थत्वात्'[6] इति। किञ्च, अन्तेदित्त्ववारणं तु 'इचक्ष् व्यक्तायां वाचि' इति पाठेऽपि सुलभम्। एवं पाठे षकारस्य 'हलन्त्यम्' इति इत्संज्ञापत्तिरिति तु नैव चिन्ताविषयः। षकारस्य इत्त्वं यदीष्टं तर्हि 'डुपचष् पाके' इत्यत्र यथा अनुबन्धवर्णानां क्रमेण पाठः कृतः तथा इह धातावपि क्रियेत। एवञ्च षकारस्य इकारापेक्षया भिन्नदेशे पाठात् षकारोऽयं धात्ववयवः इति बुद्ध्यते। ('चक्षिङः इकारस्थाने अकार एव वक्तुमुचितः'[7] इत्यन्यदेतत्)। एवं रीत्या इकारस्य अन्तेदित्ववारणसम्भवे ङित्करणं तदर्थं नेति अवगम्यते। ततश्च व्यर्थस्य सतः ङित्करणस्य अनुदात्तेत्त्वलक्षणस्य आत्मनेपदस्य अनित्यता-

ज्ञापनमेव फलं भवति।

'स्फायी वृद्धौ' इति धातुः अनुदात्तेत्, अत एव च आत्मनेपदी। तथापि तस्माद्धातोः लटि, तस्य शत्रादेशेन 'स्फायन्' इति रूपं साध्यते। इदम् 'अनुदात्तेत्वप्रयुक्तमात्मनेपदमनित्यम्' इति परिभाषायाः प्रयोजनमस्ति। 'अनर्घराघवम्' इत्याख्ये नाटके मुरारिणा वृद्धिं गच्छन् इत्यर्थे 'स्फायन्' इति प्रयोगः कृतः। तथा हि–

**'मन्दोद्भूतैः शिरोभिर्मणिभरगुरुभिः प्रौढरोमाञ्चदण्ड-**
**स्फायन्निर्मोकसन्धिप्रसरदविगलत्संमदस्वेदपूराः।**
**जिह्वायुग्माभिपूर्णाननविषमसमुद्गीर्णवर्णाभिरामं**
**वेलाशैलाङ्कभाजो भुजगयुवतयस्त्वद्गुणानुद्गृणन्ति॥'**[8]

अनुदात्तेत्त्वप्रयुक्तस्य आत्मनेपदस्य अनित्यत्वे एव अयं प्रयोगः शुध्यति।

**नागेशमतम्** – अन्तेदित्त्वव्याघातकत्वेन ङित्करणं चरितार्थमिति कथं तज्ज्ञापकं भवितुमर्हति? यदि 'चक्ष' इति अकारेणैव नुमः वारणं शक्यम्, युच्सिद्धौ अकारः बाधकस्तु न भवति इत्युक्त्वा ङित्करणस्य ज्ञापकत्वं समर्थ्यते तर्हि भाष्यानुक्तत्वात् ज्ञापकत्वं न युक्तमेव। भाष्ये इयं परिभाषा क्वचिदपि न दृश्यते। **'विचक्षणः'** इत्यत्र युच् मा भून्नाम, ल्युटा तद्रूपं सिद्धम्। ल्युट्प्रत्यये कृते प्राप्तः 'लिति'[9] इति स्वरः अस्य प्रयोगस्य छान्दसत्वादेव न भवति। छन्दसि च दृष्टानुविधिः भवति। धातौ इकारस्तु उच्चारणसौकर्याय एव। वस्तुतः दीक्षितानामपि इदमेव अभिप्रेतम्। प्रतिपादितं सर्वं माधवानुरोधेन। 'स्फायन्' इत्यादयः प्रयोगाः **असाधवः** एव। सूत्रकाराद्यसम्मतस्य ऋष्यनुक्तार्थस्य एवंविधस्य प्रयोगस्य साधुत्वप्रतिपादनमपि न युक्तियुक्तम्।

अनयोर्मतयोः अवलोकनेन स्पष्टमिदं प्रतिभाति यत् श्रीभट्टोजिदीक्षिताः कविप्रयोगं समर्थयितुं यत्नं विधाय तेनैव यत्नेन वैदिकप्रयोगोऽपि सिद्ध्यतीति हेतोः 'अनुदात्तेत्त्वलक्षणमात्मने-पदमनित्यम्' इति ज्ञापकसिद्धं न्यायम् आश्रितवन्तः इति। नागेशभट्टास्तु वैदिकप्रयोगस्य छान्दसत्वादेव सिद्धेः तत्साधनाय नायं यत्नः कर्तव्यः, **मुरारिकृतः प्रयोगस्तु प्रमाद एव** इत्याश्रित्य भाष्यानुक्तममुं न्यायं निराकृतवन्तः।

– केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

**सङ्केताक्षराणि** –
अ.सू. – अष्टाध्यायीसूत्रपाठः
वै. सि. कौ – वैयाकरणसिद्धान्तकौमुदी
प्रौ.म. बृ.श. – प्रौढमनोरमा बृहच्छब्दरत्नम्
प्रौ. म – प्रौढमनोरमा
अ.रा. – अनर्घराघवम्
धा. सं – धातुसंख्या

**सन्दर्भः**
१. अ.सू. 1.3.12
२. वै.सि.कौ. (धा.सं.1017)
३. अ.सू. 3.2.141
४. अ.सू.7.1.58
५. अ.सू.7.1.50
* प्रौ.म.बृ.श. (अदादिः, धा.सं.1017)
७. प्रौ.म. (भ्वादिः, धा.सं. 1017)
८. अ.रा. (1अङ्कः श्लो.सं.56)
९. अ.सू. 6.1.193

## देवर्षि-शास्त्री च कलाधरो वै भाषासु निष्णातमितो गतो हा!



१५ जुलाई १९३६ – २५ फरवरी २०२५

ब्रजभाषाया कवित्त-सवैयाप्रभृतिवृत्तेषु संस्कृत-कवनेन नूतनसरणिप्रवर्तकस्य मञ्जुकवितानिकुञ्ज-काव्यमालाया प्रकाशकस्य कविशिरोमणेर्भट्टमथुरा-नाथशास्त्रिणस्तनूज आख्यानवल्लरी-विद्वच्चरिता-मृताद्यनेकग्रन्थानां सर्जको भाषाविभाग-संस्कृत-शिक्षाविभागयोनिर्देशकचरः, राजस्थानसंस्कृता-कादम्या अध्यक्षचरो राष्ट्रपतिसम्मानितः संस्कृतांग्ल-हिन्दीभाषाणामधिकृतो मनीषी **देवर्षि-कलानाथ-शास्त्री** 1954 तः 1962 पर्यन्तं स्वपित्रा सह 'भारती' संस्कृतपत्रिकायाः सहायकसम्पादनकार्यम् अथ च 1997 ईशवीयाब्दत इदानीं यावत् निरन्तरं निष्ठापूर्वकं **प्रधानसम्पादक**रूपेण 'पुस्तकसमीक्षा' स्तम्भ-लेखनकर्म निर्वहन् जयपत्तने लब्धजनि**र्नवतिवर्ष**-देशीयो जयपत्तन एव 25.02.2025 दिनाङ्के शिवसायुज्यमवाप्नोत्।

संस्कृतजगतोऽपूरणीयेयं क्षतिः। 'भारती' संस्कृत-मास-पत्रिकापरिवारः शास्त्रिचरणेषु हार्दिकान् श्रद्धाञ्जलीन् अर्पयति।

**– 'भारती' पत्रिका – सम्पादकः**

---

## गुरुकलानाथं मुदा मन्महे

❑ डॉ. गौतमः पटेलः
राष्ट्रपतिसम्मानितः

वाणी यस्य सुधामयी सुरुचिरा संस्कारिता शास्त्रतः
कार्यं भव्यमनेकसारसहितं राराजते सूर्यवत्।
धैर्यं यच्च सदा मुदा विजयते हेमाद्रिकल्पं दृढं
दीव्यं तं सुकलायुतं गुरुकलानाथं मुदा मन्महे।।१।।

साहित्ये सुकुमारवस्तुविषये वेदे पुराणेऽपि वा
तर्के कर्कशवादभारभरिते लीलायते यस्य वाक्।
ज्ञानं यस्य सुधासमं गुरुकृपापाकोद्भवे केवलं
भव्यं तं सुकलायुतं गुरुकलानाथं मुदा मन्महे।।२।।

गीतोक्तान्निखिलान् गुणान् विधिवतो धैर्मानयित्वा पुनस्
ते सर्वे निजजीवने हृदयतः सम्यक्तया स्थापिताः।
दीव्ये संस्कृतवाङ्मये च सततं ये दत्तचित्ताः सदा
तं कार्ये गुरुतामयं गुरुकलानाथं मुदा मन्महे।।३।।

लोकानां हितकारकं शुभकरं यद्वर्तनं वर्तते
प्रेम्णा सर्वजनप्रमोदमहितं यत्कर्म देदीप्यते।
कीर्तिर्यस्य दिगङ्गनाङ्गणगता बम्भ्रम्यते सर्वदा
तं सिद्धं सुकलायुतं गुरुकलानाथं मुदा मन्महे।।४।।

देया मे गुरुवर्य! भक्तिरतुला शास्त्रे समाजे तथा
नित्या प्रेममयी सदा च भवता योपासिताजीवनम्।
शिष्या स्नेहमयाश्च मित्रनिवहाः सर्वे हि शोकान्विता
भावैस्त्वां परिपूजयन्ति च कलानाथं परं देशिकम्।।५।।

कृत्वा पुण्यमयोर्दिशश्च सकला विद्राव्य गाढं तमो
नक्षत्रान् विविधांश्च तारकगणान् संदीप्य स्वात् तेजसः।
सोऽयं पद्मकुलं च शोकसलिले मग्नं विधाय द्रुतं
हा!हा! नैकजनाश्रितारकमणिर्यातोऽस्तमकोंऽधुना।।६।।

श्रद्धाञ्जलिरयं दत्तः प्रेमाश्रुयुक्तचक्षुषा।
कलापूर्णाय पूर्णाय कस्मैचिन्महसे मया।।७।।

# विद्वद्वरेण्यदेवर्षिकलानाथः*

❑ डॉ. रामनारायणझा:

१

सम्यग्वेद सुसंस्कृतोत्तमवरोपस्कारवन्यौघद्यो-
ह्रासामोदविदग्धचित्तरमणो नाथो कलानाथकः।
वाणीं प्राच्यतमां शुभां सुरमयीं लावण्यपूर्णोगमां,
यस्तं नौति निरन्तरं जयपुरं काशीनिभं सुन्दरम्।।

२

शोभा येन पुरस्य वा विजयते काशीमपि नैकधा
वाचां चापि हरिः प्रतिष्ठितवचाश्लेतस्विनां चाग्रधीः।
हिन्दीं वा निपुणं प्रवेद समितिं जेता सदाबोधनः
नौम्यग्रं कुशलं च पत्तनमदो नित्यं वदान्यं च तम्।।

३

प्रेयांसं विपुलं हि संस्कृतिजुषां नाथं कलानाथितं
वक्तारं विविधायितं च विषयैः प्रेम्णा सभासुन्दरम्।
पद्मामोदविलासहासमधुरं लेखैश्शुभैर्भाषिणीः
शास्त्रं स्फोरयतां वरं नरवरं तं नौति वाकोत्तमम्।।

४

सौभाग्यं जयपत्तनस्य महतामीधस्य तत्राकृति-
मान् विद्वान् निपुणः कलावलयितो नाथो महान् संवित्।
चक्रे वासमसौ रसालशदृशो वाणीविलासीह नः
वन्दे वाग्मिनमद्य योग्यशर्मिनं संराधकं भारतीम्।।

५

भट्टोऽसावुभयं सुवेद महिमानं प्राच्यविद्याबुधः
नानाग्रन्थविलेखनो भृतधियामर्च्योऽधुना साधकः।
भारत्या विदुषां प्रभावितवचनो भो! शासने सर्वतस्,
संधे दत्तमनाः यशस्विपुरुषः राजस्थलीभूषणः।।

६

राजस्थानधरा धिया सुविपुला धन्यास्ति तेषां किल
येषां सम्प्रति बुद्धिवैभवममुं कीर्तिं च सिद्धिं नुमः।
सर्वत्रैव वचोभिरद्य कुशलाभिर्वर्धमानः कृती
पित्रात्मा समितस्सभाविलसनश्शोशुभ्यते भारते।।

७

कृत्यं नः किल किं पितुर्हि विदुषां धुर्यस्य नित्यं महत्
तस्मै राध्यति कर्मणा च वचसा स्वानेन दानेन यत्।
सत्यं योग्यतमः पिता हि मथुरानाथो नु भट्टाभिधः
पुत्रो वा प्रतिभावतां विलसतीति प्रेमपूर्णं वचः।।

८

प्राच्यार्वाच्यविधासु चिन्तनममुष्यालोकनीयं बृहत्
तन्निर्वर्ण्य चमत्कृतिं वितनुते विद्वद्वरेण्योऽपि वा।
हेतो भोः! गुण एव याति निखिलः कार्येऽपि नित्यं विधिः
दृष्टिं गच्छति सैव दृश्यत इहाशंक्यो न किञ्चिदहो।।

९

सम्मानैर्बहुभिः सुलेखिपुरुषो नाथस्सनाथीकृतो,
भट्टाह्वः मृदुलः कलासु कुशलः देवर्षिनाम्ना सितः।
तेनैवाद्य हि विश्रुतः प्रतिसभं लोकेषु संगीयते
तं देवर्षिवरं प्रसिद्धपुरुषं नौतीह नित्यं पुरी।।

१०

शिष्येषु प्रथिता नु शासनरता विद्वद्वरेण्याः प्रियाः
सर्वत्रैव हि चास्य सन्ति सुहिता नूनं तिवारीनिभाः।
नैके वा खलु शुक्नमो नहि च तान् को नैव वेत्तीति वा
विद्या सिद्धिरिदं यशोऽति विपुलं ह्येकत्र वाऽसम्भवम्।।

११

का सा वा नु सभा न यत्र विमलो नाथो नु संशोभते
वक्ता वक्तृषु मोदते स्ववचनैः ख्यातैर्यशोभिः ह्यलम्।
सिद्धस्तत्र च लेखिपूत्तमतरो पित्रागतैः लेखनैः
विद्याराधनतोऽपि वा श्रमतरैरभ्यासपूर्वैः समैः।।

१२

शास्तारः कतिथा हि सन्ति निपुणाः शिष्याश्च भो! सादरं
श्रद्धाभिः प्रणमन्ति मानमहतां सम्मानयन्तीति तम्।
यं नित्यं सुमितं च पेशलमतिं स्फारं पुरीवेदिनं
नौति सुष्ठु हि पत्तनं शुभरवं संभूषया भूषितम्।।

*अङ्केऽस्मिन् सम्प्राप्तेयं देवर्षिविषयिणी कवितावलिः दिवङ्गताय श्रीकलानाथशास्त्रिणे श्रद्धासुमनाञ्जलिः संजाता।

१३

दाधीयान् यशसा धनैश्च धनिनां विद्याभिराहोस्विदा-
युर्भिश्चापि कलाक्रियान्वितवपुस्को नाथ एषोत्तमः।
सम्मानार्हपदैः हितोत्तरमनाः नूनं पुरस्कारणा-
भिस्सत्यं कतिधा प्रियो बुधभृतां लेलायते साम्प्रतम्।।

१४

भारत्या बहुभि कलाभिरशितो वर्षैश्च सम्पादनः
प्रेयान् तीर्थसमस्सुशोधनरतः पौराणिको भूसुरः।
अध्यक्षो बहुसंस्थितस्य बहुधा सम्मानितो नित्यशः
रैवासास्थितराघवैरनुदिनं भूयानयं सारितः।।

१५

कोटायाः मम तस्य दर्शनमदो भो! लेखिनो भाषिणो
गोष्ठ्यां व्याकृतिनस्सुनप्रचरितस्योच्चायिनो नैकशः।
वार्ताभिः परमार्थितोऽहमवसा प्रोत्साहितः प्रेमतः
येषां तान् परिनौति शार्दूलमनाः शार्दूलविक्रीडितैः।।

१६

देवर्षिः किल नामतः श्रुतिपथं संराध्यते सार्थकं
सर्वेषां नितरां मनोहरतरः सूच्चार्यते सर्वतः।
देवानामृषिवद्धि योऽतिविदुषां सिद्धिं गतोऽत्राधिकां
मध्ये रामचरित्रचञ्चुरयको रामो हितं नौति वा।।

१७

मानोऽसौ महतां धनं हि विदुषां विद्वान् क्रियावानुतो-
नूचानश्च महान् श्रुतिं ह्यनुवदेन्नित्यं चरेत्तद्यथा।
तत्रासौ रमतेऽधुनातनविचारस्फोरणैः साम्प्रतं
यस्तं नौति नमोवचोभिरिह नो रामो हि नारायणः।।

१८

भारत्या भवने निवासमकरोद्यो शैलराजः पुरा
त्यागी संस्कृतरागलासलसितो नाम्ना महारैतसः।
सम्मानं नु बभूव तस्य बहुशस्तैश्चापि सम्मानितो
यो यैस्सोऽपि समादृतश्शुभमतिस्ताभ्यां नमो नैकशः।।

१९

ध्वन्यालोककृतोक्तशोभनवचोभिर्ज्ञायते गौरवं
विद्वांसः प्रथमेऽद्य वा ननु पुरा वैयाकृता एव ना।
यस्तद्वेद स सम्यगेव निपुणं विद्वान् प्रियः पार्थिवः
तत्र द्राग् रमते स यः कविचरो नाथं विनौतीह वा।।

२०

ब्राह्मीङ्गैरनिशं कलाविलसनैर्नाथैर्नवाचारितं
सम्यग् लेखविधैश्शुभै र्हि मनसासंलेखितुं प्रेर्य्यत।
राजस्थानधरा ह्यनेन नितरां धन्यायिता सर्वतः
वर्षीयानपि नित्यमेव लिखति प्रेम्णाऽधुनापि प्रभः।।

२१

नाथोऽसौ कलयाऽऽकलय्य कृतकं कृत्यं च पित्रा महन्-
तत्सर्वं निपुणं निरीक्ष्य निखिलं ग्रन्थोक्तवृत्तं बृहत्।
पन्थानं विमलं विमृश्य विधिवत् तत्रार्पितं जीवनं
शोधे लेखनकेऽमुना बहुतरं चातो हि सम्मान्यते।।

२२

नूनं वल्लरिकाभिरेष कृतवानूर्द्ध्वं मुदा संस्कृतं
पित्राऽस्यापि नु वैभवैरनुपदं वर्धापितं तद्बहु।
द्वाभ्यां वा विहितं प्रशस्तमुचितोद्दामोपमं कृत्यकं
तस्मात्तोकमुताथ वा च पितरं भट्टाभिधं भारतम्।।

२३

संयोगेष महान् बभूव महतोः वाणीमहे साम्प्रतं
शंकोच्छेदनविक्रमामृतमुदोः नित्यं सुधावर्षिणोः।
वाणीभ्यां लभटाभिराममनसोः प्रातश्च सायं मुदा
तौ नौतीह ययोः विदग्धविदुषो रामो हि नारायणः।।

२४

विद्वांसं परिवेद सम्यगनिशं विद्वान्महान् संश्रुतस्-
तत्रैनं च विनौति मैथिलवरः रामो हि नारायणः।
नित्यं वा कवयन् प्रसन्नवदनो बुद्ध्या गिरा गौरवं
काव्यं वर्णयते कलानिपुणकं नाथं सभाशोभनम्।।

२५

लेखे दत्तमतिश्च पेशलरतिः व्यालोलविद्यागतिः
नाथोऽसौ विमलाकृतिर्लघुवपुस्को वल्लिकासंगतिः।
अद्य श्वः सततं स्वसंस्कृतिरमो विद्याविलासी जनः
नूनं नौमि नमामि चैनमसितेष्वासोपमं भास्वरम्।।

२६

नाथोऽसौ नु विचक्षणः किल महान् सम्प्रेरकः सर्वदा
सर्वेषां सुमतिं जयेषु विचराणामद्य नूनं नृणाम्।
वाणीलोलजुषां प्रयत्नवियुजां ब्राह्मीत्यजां लेखिनां
नौत्येनं विदुषां वरं लिखतरं रामोहि नारायणः।।

२७

सम्पूर्णं किल जीवनं हि सुकृतं यापये मुदा सार्थकं
यस्यास्तीति स वै विदांवर इति प्रेम्णा च वक्तुं कविः।
नाथोऽसौ कलयावृतः कविमनाक्षेनं नमामः क्षमो
विद्याबोधविशारदं जयपुरे संवासिनं वाग्मिनम्।।

२८

देवर्षिः शुभलक्षणस्सुविदितो यः पत्तने सर्वतः
मञ्जोर्नाथसुतो हि संस्कृतभृतां लेखी च द्राघीयसाम्।
राष्ट्राध्यक्षवरैः पुरस्कृततरस्सम्मानितः कोविदैः
एवंभूतममुं प्रणौति विदुषां ग्रामो महान्तं महान्।।

२९

ब्राह्मीं वर्धयताऽमुना बहुतिथं ग्रन्थैश्शुभैः काव्यकै-
रन्यैश्चाप्यनिशं प्रयत्य मनसा संश्लिष्य नूनं भृशैः।
प्रेम्णा गद्यमयैर्विदग्धचरितैनैवाद्य ख्यातेन वाऽ-
तोऽलंकारमयस्सुभासितमतिर्नम्यो नु नूनं बुधैः।।

३०

भारत्यास्तनयो बुधेषु विदितो विख्यातनामा कला-
नाथोऽसौ वचसा सुशोभनतरे नैवाथ वक्ता महान्।
संस्कारान् किल रोपयन् नवनवेष्वेषूत्तमान् सर्वतः
ब्राह्म्या बालबुधेषु नित्यममृतान् नम्यो महान् सर्वशः।।

३१

श्रावं श्रावममुष्य शोभनयशो शुभ्रं च विद्याबलं
बुद्धेर्वैभवमद्य सत्यकथनं नूनं गभीरं वचः।
दर्शं दर्शमथोत शेमुषीवतश्चोत्साहपूर्णं मनो
नूनं नम्यतरस्सुलेखिपुरुषो वक्ता गिरा चर्चितः।।

३२

रामोऽमुष्य सुमैथिलः कविचणः काव्यं पिपासुरुत
विद्यार्थी निपुणं निरीक्ष्य विमलां कीर्तिं विशालामहो।
भारत्याः सुफलं वचश्च विसृतं चैनं विदग्धं कला
नाथं नौमि नमामि पुष्पितमना वैयाकृतस्सूत्तमः।।

३३

जीर्णारण्यमपीह यो हि हरितीकुर्वन्क्षणे भो! गिरा,
शक्त्या रञ्जयते बुधान् प्रतिभया लोकान्मुदा मोदयन्।
आत्मानं प्रतिपन्नबुद्धिविभवः प्रत्यग्रमेधाः कविः
तस्मात्स प्रथितोच्छ्रितो रविरिव प्रेम्णा सुपूज्यो हि नः।।

३४

गद्यं वा निकषं कवीन्द्रनिपुणैर्नित्यं हि गागद्यते
तत्रासौ रमतेऽनिशं रसमये सभ्यो समाजे कविः।
सिद्धः सारवतां सुभाषितभृतां काव्यैःसनाथः कला-
नाथो नम्यत एव पत्तनजुषां व्रातैस्सभापण्डितः।।

३५

रामोऽहं कवयामि चेतनवतां शार्दूलविक्रीडितैः
खेलामीव निरन्तरं कविकृतां काव्यैश्च मध्ये यमी।
रा जानामि भजामि काव्यनिवहान् कादंबरीः गद्यकान्
अन्यांश्चापि शुभान् रसैर्हि भरितान्नित्यं शुभान्संस्कृतान्।।

३६

सत्यं स्फोरयते मतिर्मम रघो रामस्य नित्यं सतः
आनन्दस्य चितश्चमत्कृतिमतो ज्ञानस्य द्राघीयसाम्।
द्राघीयश्चरितात्मनां कविवरेण्यानामनन्तस्य क-
लानाथं किल वर्णयन्नमृतिकां तृप्तिं प्रयातीह ना।।

३७

शार्दूलस्य नु साम्प्रतं ह्यनुदिनं विक्रीडितं हीव नो-
वेधो वाशुतरं च भो! रयवती शुद्धा नु विक्रीडति।
रेखासारमणं प्रणम्य मनसा शार्दूलविक्रीडितैः
नाथो वर्ण्यत एव सम्प्रति शुभैः काव्यैर्मनो मोदते।।

३८

कार्तज्ञ्यं भजते मनो मम शुभं काव्यात्मवत्तत्तथा
काव्यज्ञः कवितां करोमि नितरां जानामि काव्यं कविः।
रामो मैथिलजः कविं सुकलया वै नाथितं भो! कला-
नाथं वर्णयते सुमद्रकविताभिर्लेखिनं भाषिणम्।।

३९

नीरक्षीरविवेकिता वरमयी न क्वापि संदृश्यते
काव्ये वा च कवौ विशालनभसां सीमा न वै नीयते।
काव्ये भूरिपरिश्रमस्य यदि नो चावर्णनं त्वर्ण्यते
तत्स्याद् भो! छलमेव वा कितवता चातो मया वर्ण्यते।।

४०

राभस्ये नहि वर्णयामि विदितं ज्ञात्वा महिम्ना ततोऽ-
मुष्याहं प्रतिभां प्रभाविगरिमाणं चापि वीक्ष्योत्तमाम्।
सीताजानिमथोचितेन परतो नत्वा पराम्बाकृपां
शार्दूलोऽप्रतिमां कविः कविममुं कूजामि केवीव भो!।।

– ३९०, रजनी विहार, हीरापुरा, अजमेर रोड, जयपुर

पुस्तकसमीक्षा *

# भुवनेश्वरीस्तोत्राणि

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादक:

भुवनेश्वरी दशमहाविद्यास्वेका महादेवी भक्तानामुपास्या। तस्या: स्तोत्राणां सङ्कलनं प्रतिष्ठितेन सुधीवर्येण तन्त्रशास्त्रिणा पं. सरयूप्रसाद द्विवेदिना पुरा विहितमासीत्। तस्य प्रकाशनं पाण्डुलिपिसम्पादन-पूर्वकं विश्वगुरुदीप-आश्रम-शोध-संस्थानेन कृतमस्ति। संग्रहेऽस्मिन् सकलाचार्यचक्रवर्ति श्रीपृथ्वीधराचार्यकृतं 'भुवनेश्वरीमहास्तोत्रं' प्रथमं प्रकाशितमस्ति। 48 पद्यबद्धस्यास्य स्तोत्रस्य कविपद्मनाभविरचितं विस्तृतं संस्कृते भाष्यमपि प्रतिपद्यं प्रकाशितमस्ति, तदनन्तरं हिन्द्यामर्थोऽपि प्रकाशित:। अस्य स्तोत्रस्यानन्तरं 'भुवनेश्वरी-हृदयस्तव:', 25 पद्यात्मक: एकोऽन्यो भुवनेश्वरीस्तव:, तदनन्तरं 'त्रैलोक्य मंगलकवचं', 'त्रैलोक्यमोहनकवचं', 'लघुसप्तशतीस्तोत्रम्' 'भुवनेश्वरीस्तुतिरत्नम्', 'सहस्रनामस्तोत्रम्' इत्यादीन्यपि स्तोत्राणि संगृहीतानि।

इत्थं भुवनेश्वर्या: स्तोत्राणां सङ्कलनमिदं पं. सरयूप्रसादद्विवेदिविहितं संगृह्य प्रकाशितं महाविद्याया भक्तानां कृते सुमहदुपकारकं भवेत्। प्रकाशनस्यास्य सम्पादका: प्रकाशन संस्था च सुभृशं वर्धाप्यन्ते।

**भुवनेश्वरी-स्तुति:** प्रधानसम्पादक: महामण्डलेश्वर स्वामी ज्ञानेश्वर पुरी, प्रबन्धसम्पादक: एम.एल.गर्ग, सम्पादक: डॉ. सुरेन्द्रकुमारशर्मा, प्रकाशक:- विश्वगुरु आश्रम शोधसंस्थान, कीर्तिनगरं, श्याम नगरम्, सोडाला, जयपुरम्, पृ.सं. ११२, मूल्यम्- २५०/-

* एषाऽन्तिमा 'पुस्तकसमीक्षा' विहिता देवर्षिभि:, इत: परं २५.०२.२०२५ दिनांके शिवसायुज्यमवापुवन्।

**ऐसे बन सकते हैं आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 250/-, पंचवर्षीय शुल्क 1100/-, आजीवन सदस्यता ( 15 वर्ष ) शुल्क 3100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या - 2139101912498
IFS Code - CNRB0002139

नारी-स्तम्भः

# मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये

❑ डॉ. राजेश्वरी भट्टः

2025 तमे खिष्टाब्दे गणतन्त्रदिवसस्य पूर्वसंध्यायां भारतस्य सर्वोच्चेन 'पद्मभूषण' इति तृतीयेन नागरिकसम्मानेन सभाजिता, दुर्गावाहिनी इति शक्तिपीठस्य संस्थापिका - वात्सल्यग्रामस्य प्राणकल्पा- सनातनधर्मस्य संस्कृतेश्च ध्वजोत्तोलिका 'साध्वी ऋतम्भरा' राष्ट्रस्य विशिष्टा विभूतिर्वर्तते। 'श्रीरामजन्मभूमि-मुक्तिआन्दोलने' ओजस्विभाषणैर्जनजागरणं कुर्वती तपोमूर्ति ऋतम्भरा 1964 तमे खिष्टाब्दे पंजाबराज्ये, लुधियाना उपखण्डस्य 'दोराहा' ग्रामे निम्नमध्यवर्गीयपरिवारे 'निशा' नाम्ना जनिमलभत। 16 वर्षस्य वयस्येव निशा गृहं विहाय, हिन्दूपुनरुत्थानकार्ये संलग्नस्य स्वामि-परमानन्दमहाभागस्य दर्शनेन प्रभाविता तस्य सन्निधिं प्राप्तुं हरिद्वारनगरं प्रस्थितवती। ततः 1982 तमे खिष्टाब्दे 'साध्वी ऋतम्भरा' इति नवनाम्ना स्वामिपरमानन्दस्य शिष्यत्वे दीक्षिता जाता।

स्वामिपरमानन्दस्य सन्निधौ निवसन्ती ऋतम्भरा नैकेषां धर्मग्रन्थानां, शास्त्राणाञ्च अध्ययनाध्यापनमकरोत्। सहैव जनोद्बोधनाय सनातनधर्मस्य प्रचाराय प्रसाराय च भाषण-कौशलेऽपि निष्णाताऽभवत्। सद्य एव वाग्विभवा ऋतम्भरा विश्वहिन्दूपरिषदः विशिष्ट वक्तृरूपेण सम्मान्या जाता। 1992 खिष्टाब्दे नारीणां सर्वतोमुखीविकासाय ऋतम्भरा 'दुर्गावाहिनी' नाम्न्याः विश्वहिन्दूपरिषदः महिला शाखायाः स्थापनां कृतवती। संस्थाया माध्यमेन सम्प्रति नारीणां शारीरिक, मानसिक एवं आध्यात्मिकविकासाय बहुमुखी - कार्यशालानां आयोजनं क्रियतेऽनया। 1980 तमे बीजारोपिते 'श्रीरामजन्मभूमिमुक्तिआन्दोलने' साध्वी ऋतम्भराया महती भूमिका वर्तते। आन्दोलनेऽस्मिन् स्तम्भरूपेण स्मृतायाः साध्वी ऋतम्भराया सशक्तभाषणैर्जागरूका असंख्या रामभक्ता आन्दोलनस्य गतिविधिषु सक्रिया अभवन्। किमधिकं श्रूयते यत् प्रायः ५०००० संख्याका नार्योऽपि ऋतम्भराया आह्वानेन आन्दोलने सम्मिलिता जाताः। 1992 तमे खिष्टाब्दे बाबरीढांचाविध्वंसकाले मुस्लिमविरोधिगति-विधीनां आयोजनस्य मूले साध्वी ऋतम्भराया महती भूमिकाऽऽसीत्। विध्वंसस्थले जन-संकुलस्य उत्साहवर्द्धनं, नृत्यप्रदर्शनं, करतलवादनं अस्य प्रबलं प्रमाणमभवत्। अतो विध्वंसस्य त्रिदिवसानन्तरमेव 'साध्वी ऋतम्भरा' दोषीरूपेण कारागृहं प्रेषिता।

कारागृहात्प्रत्यागत्य 'साध्वी ऋतम्भरा' सार्वजनिककार्याणि विहाय अनाथबालकानां, परित्यक्तानां नारीणां, विधवानारीणां, अवैध-शिशूनां सहायतायै 2001 तमे खिष्टाब्दे वृन्दावन इति ग्रामे 'वात्सल्यग्राम' नाम्न्याः संस्थायाः स्थापनां कृतवती। अत्र 'दीदीमाँ' नाम्ना प्रथिता ऋतम्भरा भगिन्या मातुश्च भूमिकाम् निर्वहन्ती अलौकिकसुखस्य अनुभवं करोति। अत्र दीक्षिता बालकाः बालिकाश्च अद्य देश-विदेशेषु कार्यरताः सन्ति। स्वसुखपराङ्मुखी साध्वी-ऋतम्भरा आश्रमस्य अर्थव्यवस्थायै देशविदेशेषु भागवतकथाया आयोजनेन धनस्य सञ्चयं करोति। इदानीमपि 'ऋतम्भरा' 'महाकुम्भ-महोत्सवे' भागवतकथामाध्यमेन जनसमूहं

**सनातनधर्मं प्रति उद्बोध्य पुण्यमर्जयति। परमेशं कामये यत् सनातनधर्मस्य प्रचाराय प्रसाराय चैषा धर्मयात्रा सततं प्रचलेदिति। सत्यमुक्तं च गीतायां 'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये' इति।**

## हिन्दी अनुवाद

2025 के गणतन्त्र दिवस की पूर्व संध्या में भारत के सर्वोच्च तृतीय नागरिक सम्मान '**पद्मभूषण**' से सम्मानित, '**दुर्गावाहिनी** शक्तिपीठ' की संस्थापिका, '**वात्सल्य ग्राम**' की प्राणकल्पा, सनातन धर्म एवं संस्कृति की ध्वजसंवाहिका '**साध्वी ऋतम्भरा**' राष्ट्र की विशिष्ट विभूति है। 'श्रीरामजन्मभूमि आन्दोलन' में अपने ओजस्वी भाषणों से जन-जागरण करने वाली तपोमूर्ति ऋतम्भरा ने 1964 ई. में 'पंजाब' राज्य के लुधियाना जिले के '**दोराहा**' ग्राम में निम्न मध्यमवर्गीय परिवार में **निशा** नाम से जन्म लिया था। 16 वर्ष की आयु में ही निशा घर को त्यागकर हिन्दू धर्म के उत्थान के लिए समर्पित स्वामी परमानन्द के दर्शन से प्रभावित होकर उनकी सन्निधि में हरिद्वार चली गई।

1982 ई. में 'साध्वी ऋतम्भरा' नाम से स्वामी **परमानन्द** का शिष्यत्व ग्रहण कर लिया। स्वामी 'परमानन्द' के सानिध्य में ऋतम्भरा अनेक धर्मग्रन्थों एवं शास्त्रीय ग्रन्थों के अध्ययन एवं अध्यापन में संलग्न रहती थी, साथ ही जनोद्बोधन के लिए भाषणकौशल में भी निष्णात हो गई। शीघ्र ही 'ऋतम्भरा' 'विश्व हिन्दू परिषद्' की प्रवक्ता पद पर प्रतिष्ठापित हो गई। 1992 ई. में नारियों के सर्वतोमुखी विकास के लिए साध्वी ऋतम्भरा ने 'दुर्गावाहिनी' नाम से विश्व हिन्दू परिषद् की महिला शाखा की स्थापना की। इस संस्था के माध्यम से नारियों के शारीरिक, मानसिक एवं आध्यात्मिक क्षमताओं के विकास के लिए बहुमुखी कार्यशालाओं का आयोजन किया जाता है। 1980 ई. में बीजारोपित 'श्रीरामजन्मभूमि मुक्ति आन्दोलन' में साध्वी ऋतम्भरा की महती भूमिका है।

इस आन्दोलन में स्तम्भरूप में स्थित साध्वी ऋतम्भरा के जोशीले भाषणों से प्रेरित होकर असंख्य रामभक्त सक्रिय रूप में सम्मिलित हुए। प्रायः 50000 महिलाएं भी ऋतम्भरा के आह्वान से आन्दोलन में कूद पड़ीं। 1992 ई. में 'बाबरी ढांचे' के विध्वंस की घटना में मुस्लिम विरोधी गतिविधियों को भड़काने के मूल में साध्वी ऋतम्भरा की विशिष्ट भूमिका मानी जाती है। विध्वंस स्थल पर जनसंकुल का उत्साहवर्द्धन, नृत्यप्रदर्शन, तालियों की ध्वनि इसका प्रबल प्रमाण है। यही कारण था कि विध्वंस की घटना के तीन दिनों के पश्चात् ही साध्वी ऋतम्भरा को दोषी मानकर कारागृह में भेज दिया गया। कारागृह से लौटकर साध्वी ऋतम्भरा ने सार्वजनिक कार्यों को छोड़कर अनाथ बच्चों, परित्यक्ता नारियों, विधवा नारियों, अवैध शिशुओं के संरक्षण के लिए 2001 में 'वात्सल्य ग्राम' नाम की संस्था की स्थापना की। यहाँ 'दीदी माँ' नाम से प्रसिद्ध 'ऋतम्भरा जी' माँ तथा बहिन की भूमिका निर्वहन करती हैं। इस आश्रम में दीक्षित बालक-बालिकाएँ आज देश-विदेशों में कार्यरत हैं। अपने सुखों से पराङ्मुखी साध्वी 'ऋतम्भरा' आश्रम की अर्थव्यवस्था के लिए देश-विदेशों में 'भागवत कथा' के आयोजन से धन सञ्चय करती हैं। इन दिनों भी साध्वी ऋतम्भरा महाकुम्भ के मेले में भागवत कथा के माध्यम से जनसमूह को सनातन धर्म का उपदेश देकर पुण्य का अर्जन कर रही हैं। परमेश्वर से कामना है कि सनातन धर्म के प्रचार-प्रसार के लिए यह धर्मयात्रा निरन्तर चलती रहे। सत्य ही कहा गया है गीता में – 'हजारों मनुष्यों में कोई सिद्धि के लिए यत्न करता है'।

– पूर्व विभागाध्यक्षा, संस्कृतविभाग,
लालबहादुरशास्त्री कॉलेज, तिलकनगर, जयपुर।

आयुर्वेद-स्तम्भः

# ऋतुचर्या विशेषेण शीलयेत्कुसुमागमे

❑ प्रो. बनवारीलालगौड़ः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**ऋतुषु सर्वोत्कृष्टो वसन्त इत्युद्घोषयन्ति कण्ठरवेण कवयः, समन्मथाः यौवनोन्मत्ताः प्रेमिजना अप्युल्लसिताः स्वागतं कुर्वन्ति वसन्तस्य । शिशिरे शीतभीतः कुटीकुड्यकोणैकदेशेऽङ्गानि संवृत्यकम्पितया लेखन्या लेखने व्यस्तः वसन्ते शिशिरविमुक्तःसुगन्धितपवनेन समुत्साहितः प्रफुल्लितः कोऽपि कविः विरहिहृदयविकसनार्थं चारुतरस्य कुसुमसमयस्यागमनं संसूचयति-**

ऋतुओं में सर्वश्रेष्ठ वसन्त है, ऐसा कण्ठरव (स्वर) में घोषणा करते हैं कवि; और प्रेम में मग्न, यौवनोन्मत्त प्रेमीजन भी उल्लासपूर्वक वसन्त का स्वागत करते हैं। शिशिर ऋतु में ठंड से भयभीत होकर, कुटीकी दीवार के किसी कोने में अपने अङ्गों को सङ्कुचितकर, काँपती हुई लेखनी से लिखने में व्यस्त रहने वाला, वसन्त में शिशिर से मुक्त होकर, सुगन्धित पवन से प्रेरित होकर, प्रसन्नचित्त कोई कवि विरहग्रस्त व्यक्तियों के हृदयों के प्रस्फुटन के लिए इस सुन्दर पुष्पकाल (वसन्त) के आगमन की सूचना देता है-

**'सहकारकुसुमकेसरनिकर-**
**भरामोदमूर्च्छितदिगन्ते।**
**मधुरमधुविधुरमधुपे मधौ**
**भवेत्कस्य नोत्कण्ठा।।'**

'सहकार (आम) के फूलों की केसर के समूह से भरे हुए हर्ष (प्रसन्नता) से मूर्च्छित (व्याकुल, व्याप्त, भरी हुई)सभी दिशाओं वाले वसन्त में तथा मधुर मधु से विलग हुये भौंरे वाले वसन्त में किसकी उत्कण्ठा (प्रियतम पाने की लालसा, व्यग्रता) नहीं होगी?'

कलकलकण्ठेनोल्लपति चान्यः कविः-

**'मलयानिलमिलनोत्कटमद-**
**कलकल-कण्ठकलकलापः।**
**मधुरमधुविधुरमधुपो**
**मधुरयमधुना धिनोति धराम्।'**

मधुर कण्ठ से कोई अन्य कवि कहता है-

'मलय पर्वत से आने वाली हवा के मिलन से अत्यधिक मदयुक्त कलकल (भनभनाहट, अस्पष्ट) ध्वनिके समूह या शृङ्खलावाला मधुरमधु से पराङ्मुख (दूर हुआ) भ्रमर (भौंरा) मधु (मधुर रस) के प्रवाह वाले मधु से धरा (पृथ्वी) को आनंदित करता है ।

उत्कण्ठितः गद्गदः कविः कालिदासोऽपि ऋतुसंहारे गदति-

**द्रुमाः सपुष्पाः सलिलं सपद्मं**
**स्त्रियः सकामाः पवनः सुगन्धिः।**
**सुखाः प्रदोषा दिवसाश्च रम्याः**
**सर्वं प्रिये चारुतरं वसन्ते॥**

व्याकुल और भावविभोर हुए कवि कालिदास भी ऋतुसंहार में कहते हैं-

वसन्त ऋतु में वृक्ष फूलों से युक्त होते हैं, जल कमलों से भरा रहता है, स्त्रियाँ प्रेम से परिपूर्ण होती हैं, पवन सुगन्धित होता है। सन्ध्यायें (रात्रियाँ) सुखद होती हैं, दिन सुंदर होते हैं-हे प्रिये! वसन्त में सबकुछ और भी अधिक मनोहर हो जाता है।

**मदोन्मत्तः यानचालकः यथाविस्तृते सुस्पष्टेऽन्यवाहनविरहिते राजमार्गे तीव्रगतिमता वाहनेन**

**धावने व्यस्तो भवति तथैव काव्यकल्पनासु धावने व्यस्तान् कवीन् कामिजनांश्च दृष्ट्वा बुद्बुदायमानः सस्मितः कश्चिद्भिषगारोपयति वसन्तात्मके राजमार्गे सूचनापट्टसंसक्तं दण्डमेकम्, यत्र हि संसूचितम्- 'अवधेयम् अग्रेऽपायोऽस्ति'।**

मदमत्त वाहन चालक जैसे विस्तृत, स्पष्ट और अन्य वाहनों से रहित राजमार्ग पर तीव्रगति से वाहन चलाने में व्यस्त होता है, वैसे ही कवियों और प्रेमीजनोंको अपनी काव्यकल्पनाओं और प्रेम भावनाओं में तेजी से प्रवाहित होते हुओं को देखकर बुद्बुदाता हुआ, मुस्कुराता हुआ कोई चिकित्सक संकेतपट्ट से युक्त एक दण्ड को वसन्त रूपी राजमार्ग पर लगा देता है, जिस पर लिखा होता है- 'सावधान! आगे संकट है।'

पृष्टेन केनाप्युत्तरति स भिषक्-

**वैद्यानां शारदी माता पिता च कुसुमाकरः।**

**कुसुमाकरः पितृत्वेन वैद्यानां विशिष्टं भरणं पोषणञ्च करोति, यतो हि कफप्रकोपको हि कालोऽयं ज्वरकासश्वासादीन् रोगान् करोति। रोगैर्ग्रस्तास्तु जनाः चिकित्साग्रहणानन्तरं वैद्यायोपायनानि ददत्येव, तेन हि वैद्यस्य काञ्चनराशिरभिवर्धते। आचार्यश्चरकः कथयति यत्-**

किसी के द्वारा पूछे जाने पर वह चिकित्सक उत्तर देता है कि-

'वैद्यों के लिए शरद् ऋतु माता है और कुसुमाकर (वसन्तऋतु) पिता है।'

वसन्त ऋतु पिता के समान वैद्यों का विशेषरूप से भरण-पोषण करता है, क्योंकि कफ-प्रकोप करनेवाला यह कालज्वर, कास (खाँसी), श्वास (दमा) आदि रोग उत्पन्न करता है। जब लोग इन रोगों से पीड़ित होते हैं, तो वे चिकित्सा प्राप्त करने के बाद वैद्य को उपहार प्रदान करते ही हैं। इसी कारण वैद्य के पास सोने-चाँदी की संपत्ति बढ़ती रहती है।

आचार्य चरक कहते हैं कि-

**चिकित्सितस्तु संश्रुत्य यो वाऽसंश्रुत्य मानवः।**
**नोपाकरोति वैद्याय नास्ति तस्येह निष्कृतिः।।**
**च.चि. 1/4/55 )**

'चिकित्सित होकर जो व्यक्ति प्रतिज्ञा करके अथवा प्रतिज्ञा न करके भी वैद्य का उपकार नहीं करता (नोपाकरोति =प्रतिदान नहीं करता है, बदले में कुछ नहीं देता है), उसके लिए इस संसार में कोई प्रायश्चित्त (निष्कृतिः=निस्तार, ऋण चुकाना) नहीं है।' (चरकसंहिता, चिकित्सास्थान 1/4/55)

(यह श्लोक वैद्य के उपकार की अनदेखी करने वाले व्यक्ति के प्रति कठोर चेतावनी देता है। आयुर्वेद में चिकित्सक को पूजनीय माना गया है, क्योंकि वह रोगियों के कष्टों का निवारण करता है। अतः, जो व्यक्ति चिकित्सा प्राप्त करने के बाद भी वैद्य को उचित सम्मान, धन और आभार प्रकट नहीं करता, उसके लिए कोई प्रायश्चित्त नहीं होता।)

**अत एव वसन्तस्तु भिषजानां कृते सर्वदा फलद एव भवति। सावधानो हि जनः वसन्ते हितभुक् मितभुक् च भवेत्, चङ्क्रमणं यथाशक्ति व्यायामञ्चापि विदधीत।यद्यपि पुष्पसमये चङ्क्रमणन्तु विशेषेण पथ्यम्, प्रियेण प्रियया वा सह विहरणं मनोज्ञमाल्हादकरञ्चाप्यस्ति तर्ह्यपि विकीर्णेन सुमनोरजसा प्रतिश्यायस्य सम्भावना भवत्यत एव तत्तु वारयेदवधानो जनः, महर्षिश्चरकोऽपि सङ्केतयति कामिजनान् यद्**

**'वसन्तेऽनुभवेत् स्त्रीणां काननानां च यौवनम्'।**

अतः वसन्त ऋतु चिकित्सकों के लिए सदैव फलदायी सिद्ध होता है। निश्चित रूप से सजग व्यक्ति वसन्त ऋतु में हितकर एवं सीमित आहार ग्रहण करे तथा अपनी शक्ति के अनुसार नियमित रूप से भ्रमण एवं व्यायाम भी करे। यद्यपि इस पुष्पों की ऋतु में भ्रमण विशेषरूप से लाभदायक माना जाता है और प्रियजन के साथ विहार करना अत्यंत मनोहर एवं आनंददायक होता है, तथापि बिखरे हुए पुष्प-पराग (सुमनोरज) से प्रतिश्याय (एलर्जी, सर्दी-जुकाम) होने की संभावना रहती है। अतः सावधान व्यक्ति को इससे बचाव करना चाहिए।

महर्षि चरक भी इस संदर्भ में कामीजनों को संकेत देते हुए कहते हैं– 'वसन्त ऋतु में स्त्रियों एवं वनों की यौवनावस्था का अनुभव करना चाहिए।'

**अत्र 'अनुभवेद्' इत्येषा क्रिया विशिष्टार्थाव-धारिणी वर्तते इति विश्लेषयति व्याख्याकार-श्चक्रपाणिः, स कथयति यद् 'अनुभवेदिति भाषया श्लेष्मक्षयार्थं स्तोकं मैथुनमनुजानाति'। अत एव वसन्तकाले मैथुनमवधानतया शक्तिमनतिक्रम्य स्तोकमात्रयैव हि करणीयम् । यतो ह्यतिसक्तस्य शरीरं नानुरक्षतः स्नेहपरिक्षयादबलं जनं यक्ष्माऽऽविशति। एवमेव काननेषु विहरणञ्चापि पुष्परजोऽवश्याय-धूमादिनिवारणपूर्वकमेव करणीयम्।**

यहाँ 'अनुभवेत्' क्रिया विशेष अर्थ को स्थापित करने वाली मानी गई है, जिसका विश्लेषण प्रसिद्ध व्याख्याकार चक्रपाणि ने किया है। वे स्पष्ट करते हैं कि 'अनुभवेत्' शब्द का प्रयोग यह दर्शाने के लिए किया गया है कि श्लेष्म (कफ) का क्षय करने हेतु केवल अल्पमात्रा में मैथुन की अनुमति दी जाती है। इसलिए, वसन्त ऋतु में अत्यधिक संयम के साथ और अपनी शक्ति की मर्यादा को ध्यान में रखते हुए ही मैथुन करना चाहिए। क्योंकि अत्यधिक आसक्ति रखनेवाला व्यक्ति यदि अपने शरीर की समुचित देखभाल नहीं करता, तो शरीर में स्नेह (शारीरिक पोषण) की हानि हो जाती है, जिससे दुर्बलता उत्पन्न होती है और अंततः व्यक्ति यक्ष्मा (क्षयरोग) से ग्रस्त हो सकता है।

इसी प्रकार, वनों में भ्रमण भी केवल आवश्यक सावधानियों के साथ किया जाना चाहिए, विशेषरूप से फूलों के पराग, नमी, धुएँ आदि से बचाव करते हुए ही इसे करना उचित है।

**आधुनिकाश्चिकित्साविशेषज्ञाः कथयन्ति यत् केचिज्जनाः परागं प्रत्यसहिष्णवः भवन्त्यत एव सामान्येन पुष्परजसा विशिष्टानां वा पुष्पाणां परागकणैः प्रतिश्यायः कासः श्वासश्च जायते, एतेषां प्रतिश्यायादीनां सर्वेषां सहैवोत्पत्तिरे-कैकस्य वोत्पत्तिर्भवति, सर्वेष्वेतेषु छिक्कात्मकः क्षवथुश्च विशेषेणोग्रो भवति। अमरकोशे कासस्य पर्यायरूपेण क्षवथोरुल्लेखोऽस्ति, आयुर्वेदे तु सर्वत्रैव छिक्कात्मकः प्रयोगो वर्तते क्षवथुरित्यस्य। अन्यत्रापि प्रोक्तम्– 'क्षवथुः कासे छिक्कायाम्' इति हेमचन्द्रः।**

आधुनिक चिकित्सा-विशेषज्ञ कहते हैं कि कुछ लोग पराग-कणों के प्रति असहिष्णु (एलर्जिक) होते हैं। अतः, सामान्य पुष्पों के पराग-कणों से या विशेष प्रकार के फूलों के पराग कणों से प्रतिश्याय (जुकाम), कास (खाँसी) और श्वास (दमा) विकार उत्पन्न हो जाते हैं। इन प्रतिश्यायादि रोगों की उत्पत्ति एक साथ होती है, अथवा एक-एक की भी उत्पत्ति हो जाती है। इन सभी विकारों में छींक (छिक्का)

स्वरूप वाली क्षवथु (लगातार छींक आना) विशेषरूप से तीव्र होती है। अमरकोश में कास (खाँसी) के पर्यायवाचीरूप में '**क्षवथु**' शब्द का उल्लेख किया गया है। लेकिन आयुर्वेद में तो हर स्थान पर 'छिक्कात्मक' (छींक अर्थ वाले) क्षवथु शब्द का प्रयोग ही है। अन्यत्र भी इस विषय में कहा गया है-

'क्षवथुःकासे छिक्कायाम्' (हेमचन्द्र)

अर्थात्, क्षवथु का प्रयोग कास (खाँसी) और छींक के लिए किया जाता है।

**महर्षिः सुश्रुतः कथयति यत् 'मधुमाधवौ वसन्तः' स्पष्टयति च व्याख्याकारो डल्हणः यत् 'मधुः चैत्रः, माधवः वैशाखः' इति। ज्योतिः शास्त्रमते तु वर्षेऽस्मिन् 14 मार्चतः (फाल्गुनशुक्लस्य पूर्णिमातः)13 अप्रेल पर्यन्तं मीनराशौ विचरिष्यति ग्रहपतिः। ततः 14 अप्रेलतः (वैशाखकृष्णस्य प्रतिपदातः) मेषराशौ प्रविश्य 14 मई पर्यन्तं तत्रैव विचरिष्यति, एष एव वसन्त इति मत्वा वसन्तर्तुचर्या विधेया।**

महर्षि सुश्रुत कहते हैं कि 'मधु' और 'माधव' ही वसन्त ऋतु हैं। इस संदर्भ में व्याख्याकार डल्हण स्पष्ट करतेहैं कि 'मधु' चैत्रमास (मार्च-अप्रैल) और 'माधव' वैशाखमास (अप्रैल-मई) को कहा जाता है। ज्योतिषशास्त्र के अनुसार, वर्ष के इस समय में सूर्यदेव 14 मार्च (फाल्गुन शुक्ल पूर्णिमा) से 13 अप्रैल तक मीन राशि में विचरण करेंगे। इसके बाद, 14 अप्रैल (वैशाख कृष्ण प्रतिपदा) से मेष राशि में प्रवेश कर 14 मई तक वहीं विचरण करेंगे। इसी अवधि को वसन्त ऋतु मानकर वसन्त ऋतुचर्या (इस ऋतु में पालन करने योग्य चर्या) का पालन किया जाना चाहिए।

**सर्वप्रथमन्त्वत्र पूर्वो विधिः शिशिरर्तुचर्याविधिः क्रमेण त्याज्यः, क्रमाच्च सेवनीयोऽपरो विधिः वसन्तर्तुचर्याविधिः। यतो हि राशिपरिवर्तनं भविष्यति अत एव मीनमेषौ वसन्तात्मकाविति मत्वा वसन्तर्तुचर्या विधेया, वसन्तस्त्वस्मिन् वर्षे 14 मार्चतः 14 मई पर्यन्तं मीनमेषात्मकोऽस्ति अत एवैतदनुसार्येवमधुमाधवौ (मधुः चैत्रः, माधवः वैशाखः) वर्षेऽस्मिन् वसन्तः।**

सबसे पहले, शिशिर ऋतुचर्या (शिशिर ऋतुकी दिनचर्या) को क्रमशः छोड़ देना चाहिए और धीरे-धीरे वसन्त ऋतुचर्या को अपनाना चाहिए। क्योंकि इस समय सूर्य की राशि में परिवर्तन होगा, अतः मीन और मेष राशियों को वसन्त ऋतु से संबंधित माना जाता है। इसी कारण वसन्त ऋतुचर्या का पालन आवश्यक है। इस वर्ष **वसन्त ऋतु 14 मार्च से 14 मई** तक रहेगी, जब सूर्य मीन और मेष राशियों में स्थित होगा। अतः इसी आधार पर, मधु (चैत्र) और माधव (वैशाख) ही इस वर्ष वसन्त है।

**आदानात्मकाः हि शिशिरवसन्तग्रीष्माः, तेषु भगवानाप्यायतेऽर्कः, तिक्तकषायकटुकाश्च रसा बलवन्तो भवन्ति, उत्तरोत्तरं च सर्वप्राणिनां बलमुपहीयते। प्राणिनां बलहानिस्तु शिशिरेणैव प्रारभ्यते सा तु स्वल्पैव। कुसुमसमये तु मध्यस्वरूपा बलहानिर्भवति प्राणिनाम्, अत एव शरीरिणां दीधितिर्मन्दा भवति, सुरम्यं वातावरणन्तु दृष्ट्वा मनस्तु दीधितिमदुच्छलति, तरङ्गायितं हि तदुड्डीयते।**

आदान स्वरूप वाली शिशिर, वसन्त और ग्रीष्म होती हैं, इन तीन ऋतुओं में सूर्यदेव (अर्क) क्रमशः अधिकाधिक तेजस्वी होते जाते हैं। इन ऋतुओं में तिक्त (कड़वा), कषाय (कसैला) औरकटु

(तीखा) रस अधिक प्रभावी होते हैं। इन्हीं ऋतुओं के प्रभाव से समस्त प्राणियों की शारीरिक शक्ति (बल) उत्तरोत्तर क्षीण होती जाती है। शिशिर ऋतु में बलहानि की शुरुआत होती है, वह (बलहानि) तो बहुत थोड़ी ही होती है। वसन्त ऋतु (कुसुम समय) में यह शक्तिह्रास मध्यम स्तर का होता है। इसी कारण, शरीर की आभा (कांति और स्फूर्ति) मंद पड़ने लगती है। किन्तु, सुहावने वातावरण को देखकर स्फूर्तियुक्त मन तो उछलता है तथा स्फूर्तियुक्त (प्रसन्नता की तरङ्गों से युक्त वह) उड़ने लगता (झूमने लगता) है।

**वसन्ते दीधितिमद्दीधीतिभिः स्वल्पस्त्रस्तो जनः प्रायः शीतलानि पेयान्यनुपिबत्याचूषति वा प्रतिश्यायनिदानात्मकानि 'आइसक्रीम' इत्यादीनि। एतानि नूतनान्याविष्कृततमान्यतिशीत-संस्पर्शात्मकानि श्लेष्मप्रकोपकाण्यावर्तितेन घनीभूतेन दुग्धेन विनिर्मितानि चूष्याणि भवन्ति। आचूषति यदा जनः वसन्ते तदा प्रतिश्यायेन ग्रस्तो भवति सः।**

वसन्त ऋतु में सूर्य की किरणों से थोड़ा सा पीडित (प्रभावित व्यक्ति) प्रायः प्रतिश्याय (सर्दी-जुकाम) के निदान स्वरूप अत्यधिक ठण्डे पेय पदार्थों को पीता है या आइसक्रीम जैसी अतिशीतल वस्तुओं को चूसता है। ये (आइसक्रीम एवं अन्य) नवीन आविष्कृततम अतिशीतल संस्पर्श वाले श्लेष्म (कफ) को बढ़ाने वाले पदार्थ घनीभूत (उबालेगये) दूध से बने हुये चूसने योग्य होते हैं। यदि व्यक्ति इन्हें वसन्त में चूसता है तो प्रतिश्याय से ग्रस्त हो जाता है।

**प्रतप्तो घर्मत्रस्तो हि जनः सहसा शीतलं पेयं जलं वा पिबत्यथवाऽऽचूषति शीतलं चूष्यं तदा सद्य एव प्रतिश्यायः जायते, तदुपेक्षणादथवोपेक्षणं विनाऽपि तेन प्रतिश्यायेन सहैव तल्लक्षणात्मकः पृथग्रोगात्मकश्च कासो जायते।**

गर्मी से व्याकुल व्यक्ति यदि सहसा शीतल जल या ठण्डे पेय का सेवन कर लेता है, या कोई चूसने योग्य ठण्डी वस्तु चूस लेता है, तो तुरंत ही प्रतिश्याय (जुकाम) उत्पन्न हो जाता है। यदि इस स्थिति की उपेक्षा की जाए, या उपेक्षा न भी की जाय, तो प्रतिश्याय के लक्षण के रूप में उसके साथ-साथ कास (खाँसी) भी प्रकट हो जाता है, अथवा (कास) पृथक् रोग के रूप में उत्पन्न हो जाता है।

**प्रतिश्याय-कास-श्वास-तन्द्रा-निद्राधिक्य-मुखस्रावापक्ति-हृदयोपलेप-कण्ठोपलेप-गुरुगात्रताऽऽलस्यादीनां श्लेष्मविकाराणामनुकूलो हि वसन्तः, अत एव गुर्वम्लस्निग्ध-मधुरद्रव्याणां सेवनं वसन्ते वर्जयेदवधानतयैव वा स्वल्पमात्रया कदाचित् सेवेत। दिवास्वप्नं तु सर्वथा वर्जयेत्, दिवास्वापं तु सर्वर्तुष्वेव कफावहः, अत एव ग्रीष्मातिरिक्तेषु सर्वर्तुषु दिवास्वप्नं निषिद्धम्। यो हि शिशिरवद्वसन्तेऽपि नियमितरूपेणाभ्यङ्गमुत्सादनञ्च करोति तस्य त्वचि रौक्ष्यं न जायते। अभ्यङ्गस्तु कफविकाराणां सम्भावनामपि निराकरोति।**

प्रतिश्याय (सर्दी-जुकाम), कास (खाँसी), श्वास (दमा), तंद्रा (ऊँघना), निद्राधिक्य (अत्यधिक नींद), मुखस्राव (मुख से अधिक लार बहना), अपक्ति (अपच), हृदयोपलेप (हृदय में भारीपन), कंठोपलेप (गले में कफ का लेप), गुरुगात्रता (शरीर में भारीपन) और आलस्य जैसे श्लेष्म (कफ) संबंधी विकारों के लिए वसन्त ऋतु अनुकूल होती है। इसीलिए, गुरु (भारी), अम्ल (खट्टे), स्निग्ध (चिकने) और मधुर (मीठे) पदार्थों का सेवन वसन्त में त्याग देना चाहिए या फिर सावधानी से ही

कभी-कभी बहुत कम मात्रा में लेना चाहिए।

दिवास्वप्न (दिन में सोना) पूरी तरह वर्जित है, क्योंकि यह सभी ऋतुओं में कफ को बढ़ाने वाला होता है। इसलिए ग्रीष्म ऋतु को छोड़कर अन्य सभी ऋतुओं में दिवास्वप्न निषिद्ध माना गया है। जो व्यक्ति शिशिर ऋतु की भाँति वसन्त ऋतु में भी नियमितरूप से अभ्यंग (तैल-मालिश) और उत्सादन (उबटन) करता है, उसकी त्वचा में रूखापन नहीं होता। अभ्यंग (मालिश) कफ विकारों की संभावना को भी समाप्त करता है।

**वसन्ते तूद्वर्तनं धूमं कवलग्रहमञ्जनञ्च विशेषेण सुखावहम्, विशेषेण कफहराण्येतान्युद्वर्तनादीनि क्रमशः त्वङ्नासामुखनयनप्रसादकानि कफोपलेपहराणि मुखस्रावापक्ति-हृदयोपलेप-कण्ठोपलेप-गुरुगात्रताऽऽलस्यादीनाञ्चाप्य-पहारकानि भवन्ति।**

वसन्त ऋतु में उबटन (उद्वर्तन), धूमपान (औषधीय धूमपान), कवलग्रह (मुँह में औषधीय द्रव्यों का धारण, गरारे करना), और अंजन करना विशेष रूप से सुखद और लाभकारी होते हैं। विशेषकर ये सभी उद्वर्तनादि उपाय कफ का नाश करने वाले हैं और क्रमशः त्वचा, नाक, मुख तथा नेत्रों के लिए हितकारी होते हैं। ये कफ के उपलेप को दूर करने वाले और मुख से लार गिरना, भोजन का पाक न होना, हृदय में भारीपन, गले में कफ जमना, शरीर में भारीपन और आलस्य जैसी समस्याओं को दूर करने वाले होते हैं।

**हेमन्ते शिशिरे तु जनाः सामान्यतया स्नानपानादिषूष्णोदकशीलनमेव कुर्वन्त्यत एव तत्त्यजनं वसन्ते सहसा न कुर्वीत, कुसुमागमे सति सुखाम्बुना शौचविधिं शीलयेत्। स्वल्पमात्रया क्षौद्रप्रयोगस्तु कफापहः, वसन्ते सर्वथा दधिवर्जनं समुचितम्।**

हेमन्त और शिशिर ऋतु में लोग सामान्यतः स्नान और पीने आदि में गर्म पानी का उपयोग करते हैं। अतः वसन्त ऋतु में अचानक इसे पूरी तरह से त्यागना उचित नहीं होता। वसन्त ऋतु के आगमन के साथ ही हल्के गुनगुने पानी से शौचविधि (स्नानादि) करनी चाहिए। इसके अतिरिक्त, थोड़ी मात्रा में शहद का सेवन कफनाशक होताहै। वसन्त ऋतु में दही का सेवन पूर्णतः वर्जित माना गया है।

**कुसुमसमये सूर्यसन्तापात् किञ्चिन्म्लानो हि जनः छायामन्विच्छति तत्प्रतीष्यति च किन्तु तत्र स्थातु-मनुत्सुकः क्षणादेव त्यजति तत्स्थानम्, यतो हीष-दसहमपि तपनं सहते। वसन्ते घस्रकृदुस्रैरीरितः श्लेष्मा सर्वप्रथमन्तु कायाग्निं बाधते, ततः बहून्रोगान्प्रकुरुते। तस्माद्वसन्तेकर्माणि वमना-दीनि कारयेत्। व्याख्याकारश्चक्रपाणिः कथयति यत् 'दोषचयादिक्रमोक्तपौषमाघात्मके हेमन्ते श्लेष्मचयः'।**

वसन्त ऋतु में सूर्य की गर्मी से व्यक्ति कुछ म्लान (थोड़ा थका हुआ) अनुभव करता है और छाया की इच्छा करता है उसकी ओर जाता भी है, परंतु वहाँ अधिक समय तक न रुकने की इच्छा वाला वह क्षणभर में ही उस स्थान को छोड़ देता है, क्योंकि थोडे सहन न किए जाने वाले सूर्य को भी वह सहन कर लेता है। वसन्त में (शरीर में सञ्चित) श्लेष्मा सूर्य की किरणों से प्रेरित हुआ (विलायित हुआ) पहले जठराग्नि (पाचनशक्ति) को बाधित करता है और फिर अनेक प्रकार के रोग उत्पन्न करता है। इसलिए वसन्त ऋतु में शरीर को शुद्ध करने वाले उपाय, जैसे वमन (औषधीय उल्टी) आदि, करने चाहिए। व्याख्याकार चक्रपाणि भी कहते हैं कि-

'दोषचयादिक्रमोक्त पौष एवं माघ वाली हेमन्त ऋतु (पौष-माघ) में श्लेष्मा (कफ) सञ्चित होता है।'

**कथनस्यास्याभिप्रायोऽयमस्ति यत्कदाचिद् प्रावृडाद्यृतुक्रमेण फाल्गुनचैत्रौ वसन्तो भवति, न तु चैत्रवैशाखः। यतो हि रसोत्पत्तिक्रमाभिहित मार्गशीर्षपौषात्मके हेमन्ते प्रकृतत्वाद्दोषचयो बुध्यते, स च नाभिप्रेतः; उक्तस्तु दोषचयादि-क्रमोक्तपौषमाघात्मके हेमन्ते श्लेष्मचयः। निष्कर्षस्त्वयमस्ति यत्पौषेमाघे च मासयोरेव दोषचयो भवत्यत एव चैत्रमास एव वमनं विधेयम्।**

इस कथन का अभिप्राय यह है कि कभी-कभी प्रावृट् (बरसात) आदि ऋतु-क्रम के अनुसार वसन्त ऋतु फाल्गुन और चैत्र महीनों में भी हो सकती है, उस क्रम में यह चैत्र और वैशाख मास में नहीं होती। क्योंकि रसोत्पत्ति-क्रम में कहे गये मार्गशीर्ष और पौष मास वाले हेमन्त में स्वभाव से ही दोष का सञ्चय जाना जाता है, इसलिए वह (मार्गशीर्ष और पौष मास वाला हेमन्त) अभिप्रेत नहीं है (नहीं माना जाता है), कहा भी गया है कि दोषचयादि क्रमोक्त पौष एवं माघ वाले हेमन्त में ही श्लेष्मा का संचय होता है। निष्कर्ष तो यह है कि पौष और माघ महीनों में ही कफ का संचय होता है इसलिये चैत्रमास में इसे निकालने के लिए वमन कर्म करवाना चाहिए।

**तेन हि श्लेष्मणः समूलं निःसरणं भवति, कथयत्याचार्यश्चरकः यत्- 'वमनं तु सर्वोपक्रमेभ्यः श्लेष्मणि प्रधानतमं मन्यन्ते भिषजः, तद्ध्यादित एवामाशयमनुप्रविश्योरोगतं केवलं वैकारिकं श्लेष्ममूलमूर्ध्वमुत्क्षिपति, तत्रावजिते श्लेष्मण्यपि शरीरान्तर्गताः श्लेष्मविकाराः प्रशान्तिमापद्यन्ते, यथाभिन्ने केदारसेतौ शालियवषष्टिकादीन्यनभिष्यन्द्यमानान्यम्भसा प्रशोषमापद्यन्ते तद्वदिति' (च.सू.20/19)।**

उससे (वमन कर्म से) कफ दोष का समूल निर्हरण हो जाता है। आचार्य चरक कहते हैं कि-

'श्लेष्म (कफ) को दूर करने के लिए वमन चिकित्सा (औषधीय उल्टी) सभी उपायों में सर्वोत्तम मानी जाती है। क्योंकि यह प्रारम्भ में ही आमाशय में प्रवेश कर, रोगकारक सम्पूर्ण विकृत कफ को ऊपर की ओर निकाल देती है। इस तरह से श्लेष्मा को जीत लिये जाने पर (इस कफ के बाहर निकाल दिए जाने पर) शरीर के अंदर स्थित अन्य कफजन्य विकार भी शान्त हो जाते हैं। जिस प्रकार खेतों में जलसंचय के लिए बनाई गई नहर या क्यारी (केदार सेतु) के टूट जाने पर (पानी बाहर बह जाता है जिससे) धान, जौ, गेहूँ आदि भीगे हुये नहीं होने से वह क्यारी सूख जाती है, उसी प्रकार (उसी प्रकार वमन कर्म के द्वारा शरीर में सञ्चित कफदोष समाप्त हो जाता है, जिससे कफ जनित रोग भी समाप्त हो जाते हैं।)' (चरक संहिता, सूत्र स्थान 20/19)

**यथा हि प्रचीनकाले चिकित्सकास्त्वायुर्वेदीयाः सहजरूपेण वमनादीनां कर्मणां सम्पादनं कुर्वन्ति स्म तथैव वर्तमानकालीना आयुर्वेदज्ञाः सहजतयैव वमनादीनि कर्माणि सम्पादयन्ति। अत एव पुरुषं पुरुषं वीक्ष्य वमनं शिरोविरेचनं धूमपानञ्च यथावश्यकरूपेण चैत्रमास एव सम्पादयेत्, तेन हि कालप्रभावजन्याः श्लेष्मविकाराः नोत्पद्यन्ते। वसन्तस्य प्रारम्भिकेषु दिवसेषु प्रातःकाले रात्रौ तु किञ्चिच्छैत्यमनुभूयाप्यनवधानो जनः तमुपेक्षते तदाऽसात्म्यजेन प्रतिश्यायेन ग्रस्तो भवति सः।**

जिस प्रकार प्राचीनकाल में आयुर्वेद चिकित्सक

सहजरूप से वमन आदि पंचकर्म उपचारों का संपादन किया करते थे, उसी प्रकार वर्तमान समय के आयुर्वेद-विशेषज्ञ भी इन कर्मों को सहजता से संपन्न करते हैं। इसलिए प्रत्येक व्यक्ति की प्रकृति और स्थिति को ध्यान में रखते हुए वमन, शिरोविरेचन और धूमपान आवश्यकरूप से चैत्र मास में ही करें। इससे ऋतु परिवर्तन के कारण उत्पन्न होने वाले कफ विकार उत्पन्न नहीं होते। वसन्त ऋतु के प्रारम्भिक दिनों में प्रातःकाल और रात्रि के समय कुछ शीतलता बनी रहती है। लेकिन असावधान व्यक्ति इसे नज़रअंदाज कर देता है, जिससे वह असामान्य (असात्म्य) रूप से उत्पन्न होने वाले प्रतिश्याय (सर्दी–जुकाम) से ग्रस्त हो जाता है।

**निचितः सञ्चितो वसन्तपूर्वकाले, ईरितो (विलायितो) वसन्ते। कायाग्निमिति कायनिर्वर्तकमग्निं जाठरं, न तु धात्वग्निविशेषमात्रम्। तत इत्यत्र चकारो लुप्तनिर्दिष्टो बोद्धव्यः, तेन ततोऽग्निवधाच्चेत्यर्थः; यदि वाततोऽग्निवधानन्तरम्दोषचयादिक्रमोक्तपौषमाघात्मके हेमन्ते श्लेष्मचयः। अनुभवेदितिभाषया श्लेष्मक्षयार्थं स्तोकं मैथुनमनुजानाति।**

वसन्त से पहले (हेमन्त और शिशिर ऋतु में) निचित अर्थात् सञ्चित कफ और वसन्त ऋतु में यह प्रकुपित होकर विलीन होने लगता है। 'कायाग्नि' का अर्थ है– वह अग्नि जो शरीर को बनाए रखती है, अर्थात् जठराग्नि, यहाँ 'धात्वग्नि' की बात नहीं की जा रही, (बल्कि संपूर्ण शरीर को क्रियाशील रखने वाली अग्नि (पाचन शक्ति) की चर्चा है)। 'ततः' शब्द के साथ 'चकार' का प्रयोग लुप्त निर्देश के रूप में किया गया है, अर्थात् 'ततः' का अर्थ है– 'ततोऽग्निवधाच्च' (अग्नि के मंद पड़ने से)। इसका एक अन्य अर्थ यह भी हो सकता है– ('ततोऽग्निवधानंतरम्') अग्नि के मंद पड़ने के बाद दोषचयादि क्रम में कहे गये पौष एवं माघ वाले हेमन्त में कफ का संचय होता है। (वसन्त ऋतु में यह प्रकुपित होकर शरीर में विभिन्न रोग उत्पन्न करता है)। चक्रपाणि ने 'अनुभवेद्' शब्द की व्याख्या करते हुए बताया है कि– कफ का क्षय करने के लिए थोड़े मात्रा में मैथुन करने की अनुमति दी जाती है)।

**सर्वर्तुषु प्रातर्निशि नस्तः स्नेहाङ्गुलिं दद्यात्, कफात्मके वसन्ते तु नस्यं विशेषेण हितकरं भवति, तदपि पञ्चकर्माङ्गभूतं विधिविहितं विशिष्टं नस्यकर्मैव विधेयम्। यदि चेत्तदसम्भवं तदा तु नित्यं प्रतिश्यायश्वासकासादिरोगाणां निदानानां निवारकस्य घ्राणेन्द्रियं बलप्रदस्य प्रतिमर्शस्य प्रयोगस्तु परमावश्यकः। सर्वदा हितकरो ह्येषः कदाचिदपि व्यापत्तिमान् न भवति। अस्य वर्णनं पूर्वस्मिँल्लेखे कृतम्।**

सभी ऋतुओं में प्रातःकाल एवं रात्रि में नाक में तैल लगाना चाहिये। वसन्त ऋतु कफप्रधान होने के कारण नस्य विशेष रूप से हितकर होता है। वह (नस्य कर्म) भी पंचकर्म के अङ्ग वाला विशिष्ट उचित विधि से किया जाने वाला ही करना चाहिए। यदि विधिपूर्वक पंचकर्मात्मक नस्यकर्म करना संभव न हो, तो प्रतिदिन प्रतिश्याय, श्वास, कास (खांसी) आदि रोगों के कारणों का निवारण करने वाले, घ्राणेन्द्रिय (नाक) को बल प्रदान करने वाले प्रतिमर्श नस्य का प्रयोग करना परमावश्यक है। सदा हितकारी यह कभी किसी प्रकार की हानि नहीं करता। प्रतिमर्श नस्य का विस्तृत वर्णन पूर्वलेख में किया जा चुका है।

# राजस्थान संस्कृत अकादमी – एक परिचय



डॉ. लता श्रीमाली

राजस्थान संस्कृत अकादमी, जयपुर की स्थापना वर्ष 1980 में संस्कृत दिवस पर राजस्थान सरकार के द्वारा की गई। संस्कृत अकादमी की मुख्य गतिविधियाँ एवं संस्कृत भाषा एवं उसके साहित्य का संरक्षण, विकास एवं प्रोत्साहन करने की दृष्टि से केन्द्रीय शोध संस्थान की स्थापना, संस्कृत वाङ्मय में अन्तर्विष्ट ज्ञान को पुस्तकों के संग्रह, संपादन, प्रकाशन, निर्वचन, समीक्षा, अनुवाद आदि के माध्यम से प्रकाश में लाना, देश की भावनात्मक एकता की दृष्टि से उपयुक्त संस्कृत साहित्य का प्रचार एवं प्रसार, संस्कृत साहित्यकार कल्याण कोष की स्थापना तथा उसका उपयोग, वेदों के पर परागत उच्चारण व वैदिक प्रक्रियाओं का संरक्षण प्रशिक्षण, प्रकाशन एवं प्रचार, संस्कृत को जनमानस में लोकप्रिय बनाने, संस्कृत मौलिक लेखन को प्रोत्साहन देने, राजस्थान में उपलब्ध संस्कृत साहित्य को प्रकाशित करने तथा नवोदित प्रतिभा को प्रकाश में लाना है। संस्कृत अकादमी अपने स्थापना वर्ष से निरन्तर दायित्व का सफलतापूर्वक निर्वहन कर रही है।

राज्य सरकार के आर्थिक अनुदान से अकादमी प्रान्त में 27 जिलों में 37 वेद विद्यालयों का संचालन कर रही है।

- **संस्कृत शोध पत्रिका 'स्वरमंगला' का नियमित प्रकाशनः-**

  संस्कृत के प्राचीन शास्त्रीय सिद्धान्तों, प्रौढ़ विद्वानों के ग्रन्थों एवं उन पर लिखे गये प्रौढ़ विद्वानों के शोध लेखों से वर्तमान संस्कृत जगत् को लाभान्वित करवाने के साथ ही संस्कृत की नवीन रचनाधर्मिता को प्रोत्साहन देने की दृष्टि से इस अकादमी द्वारा स्वरमंगला त्रैमासिक संस्कृत शोध पत्रिका का नियमितता के साथ प्रकाशन किया जा रहा है। यह पत्रिका अपने शोध आलेखों, काव्य, कथा, नाटक आदि विविध प्रकार की सामग्री से सुसज्जित होकर सम्पूर्ण भारत में प्रौढ संस्कृत पत्रिका के रूप में प्रतिष्ठित है तथा यूजीसी द्वारा पीयर रिव्यूड (समकक्ष समीक्षित) जर्नल की श्रेणी में आती है।

- **ग्रन्थों का प्रकाशनः-**

  अकादमी संस्कृत साहित्य के विभिन्न विषयों में

उत्कृष्ट रचनाओं को ग्रन्थागार मुद्रण कार्य भी नियमित रूप से कर रही है। अकादमी की स्थापना से अब तक 92 ग्रन्थों का प्रकाशन किया जा चुका है। अकादमी का साहित्य विक्रय हेतु ऑनलाइन उपलब्ध है।

- **पुरस्कार एवं सम्मानः-**

  संस्कृत में मौलिक लेखन को प्रोत्साहन देने की दृष्टि से अकादमी प्रतिवर्ष अखिल भारतीय, राज्य स्तरीय पुरस्कार एवं सम्मान प्रदान करती है।

- **आर्थिक सहायताः-**

  अकादमी प्रतिवर्ष निम्नलिखित प्रयोजनों हेतु आर्थिक सहायता प्रदान करती हैः-

  1. विपन्न संस्कृत विद्वानों अथवा उनके अभाव में उनकी विधवाओं को।
  2. संस्कृत ग्रन्थों के प्रकाशनार्थ।
  3. प्रान्त से प्रकाशित होने वाले संस्कृत पत्र-पत्रिकाओं को आर्थिक सहायता।

**विभागीय प्रमुख कार्य**

1. **वेद विद्यालय पुरस्कार योजना** के अन्तर्गत वेद विद्यालय पुरस्कार योजना लागू की गयी। जिससे वेद को समर्पित संस्थाओं/छात्रों को प्रोत्साहन दिया जा सके।

2. **राष्ट्रीय पाण्डुलिपि मिशन से अनुबन्ध** के अन्तर्गत राज्य सरकार के माध्यम से 'वैदिक हैरिटेज एवं पाण्डुलिपि शोध संस्थान' में MRC/MCC सेंटर में पाण्डुलिपियों का सर्वेक्षण, संरक्षण का कार्य किया जा रहा है।

3. **संस्कृत कल्याण कोष प्रस्ताव** के अन्तर्गत राजस्थान 'संस्कृत कल्याण कोष' की स्थापना की गयी है।

4. **नवीन संस्था मान्यता नियमावली के अन्तर्गत** संस्कृत सेवी संस्थाओं को अकादमी से जोडने का कार्य किया जाता है।

5. **अकादमी द्वारा** संस्कृत भाषा के प्रचार-प्रसार के लिए विभिन्न क्षेत्रों में संस्कृत सम्भाषण प्रशिक्षण शिविर, ज्योतिष, पौरोहित्य प्रशिक्षण शिविर, मुख्यमन्त्री कौशल विकास योजनान्तर्गत पूजक अर्चक प्रशिक्षण केन्द्र, राष्ट्रीय, अन्तर्राष्ट्रीय सम्मेलन, लिपि प्रशिक्षण शिविर आदि समय-समय पर आयोजित किये जाते हैं।

राजस्थान संस्कृत अकादमी का प्रमुख ध्येय वेदों के पर परागत उच्चारण व वैदिक प्रक्रियाओं का संरक्षण प्रशिक्षण, प्रकाशन एवं प्रचार, संस्कृत को जनमानस में लोकप्रिय बनाने, संस्कृत मौलिक लेखन को प्रोत्साहन देने, राजस्थान में उपलब्ध संस्कृत साहित्य को प्रकाशित करने तथा नवोदित प्रतिभा को प्रकाश में लाना है।

- डॉ. लता श्रीमाली
निदेशक
राजस्थान संस्कृत अकादमी
जे-15, अकादमी संकुल,
झालाना सांस्थानिक क्षेत्र, जयपुर।
मोबाइल नं. 9414543345



श्री नरेन्द्र मोदी
माननीय प्रधानमंत्री



श्री भजनलाल शर्मा
माननीय मुख्यमंत्री

# अवसरों के खुल रहे द्वार
# युवाओं के लिए नौकरियां अपार

## वर्ष 2025 में लगभग 81000 सरकारी नौकरियों हेतु परीक्षाओं का कैलेंडर

| क्र.सं. | पदनाम | पदों की संख्या | परीक्षा की तिथि |
|---|---|---|---|
| 1 | [illegible] | 1621 | 04 से 05 जनवरी, 07 से 10 जनवरी |
| 2 | सहायक अभियोजन अधिकारी (प्र.) | 181 | 19 जनवरी |
| 3 | [illegible] - 2024 (प्र.) | 733 | 02 फरवरी |
| 4 | कनिष्ठ अभियंता | 1226 | 06 से 11 और 22 फरवरी |
| 5 | पुस्तकालयाध्यक्ष - माध्यमिक शिक्षा | 300 | 16 फरवरी |
| 6 | [illegible] | 72 | 23 फरवरी |
| 7 | अधिशासी अधिकारी | [illegible] | 23 मार्च |
| 8 | राजस्व अधिकारी | 21 | 23 मार्च |
| 9 | जेल प्रहरी | 803 | 09, 11 व 12 अप्रैल |
| 10 | कृषि अधिकारी | 32 | 20 अप्रैल |
| 11 | शारीरिक प्रशिक्षण अनुदेशक<br>पुस्तकालयाध्यक्ष - संस्कृत शिक्षा | 20<br>20 | 04 से 06 मई |
| 12 | [illegible]<br>सहायक [illegible] | 32<br>20 | 07 मई |
| 13 | सहायक आचार्य (8 विषय) चिकित्सा शिक्षा विभाग | 15 | 12 से 16 मई |
| 14 | वरिष्ठ वैज्ञानिक अधिकारी | 14 | 12 से 16 मई |
| 15 | [illegible] अधिकारी | 06 | 17 मई |
| 16 | कनिष्ठ तकनीकी सहायक | 2000 | 18 मई |
| 17 | सहायक अभियोजन अधिकारी (मुख्य) | - | 01 जून |
| 18 | 22 कैडर के विभिन्न पद - चिकित्सा एवं स्वास्थ्य विभाग (एन.एच.एम.) | [illegible] | 02 से 13 जून |
| 19 | पशुधन सहायक | [illegible] | 13 जून |
| 20 | [illegible] | [illegible] | 16 जून |
| 21 | आर.ए.एस. - 2024 (मुख्य) | - | 17 से 18 जून |
| 22 | [illegible] (24 विषय) | [illegible] | 23 जून से 01 जुलाई |
| 23 | सहायक आचार्य - चिकित्सा शिक्षा विभाग | [illegible] | 22 जून से 06 जुलाई |
| 24 | [illegible] | [illegible] | 07 जुलाई |
| 25 | [illegible] | [illegible] | 07 जुलाई |
| 26 | सहायक [illegible] अधिकारी | 24 | 08 जुलाई |
| 27 | कनिष्ठ [illegible] | [illegible] | 08 जुलाई |
| 28 | सहायक [illegible] | [illegible] | 09 जुलाई |
| 29 | अनुसंधान सहायक | [illegible] | 10 जुलाई |
| 30 | [illegible] | [illegible] | 11 जुलाई |
| 31 | पुस्तकालयाध्यक्ष - माध्यमिक व संस्कृत शिक्षा | [illegible] | 27 जुलाई |
| 32 | [illegible] | [illegible] | 29 जुलाई |
| 33 | सहायक [illegible] अधिकारी | [illegible] | [illegible] जुलाई |
| 34 | [illegible] | [illegible] | 30 जुलाई से 01 अगस्त |
| 35 | [illegible] | [illegible] | 11 अगस्त |
| 36 | वरिष्ठ अध्यापक | 2129 | 07 से 12 सितम्बर |
| 37 | [illegible] अधिकारी | [illegible] | 15 सितम्बर |
| 38 | चतुर्थ श्रेणी कर्मचारी | 52453 | 18 से 21 सितम्बर |
| 39 | सहायक अभियंता (प्र.) | [illegible] | 28 सितम्बर |
| 40 | सहायक [illegible] अधिकारी | [illegible] | 12 अक्टूबर |
| 41 | सहायक कृषि अधिकारी<br>कृषि अनुसंधान अधिकारी<br>सहायक कृषि अनुसंधान अधिकारी<br>[illegible] अधिकारी | [illegible]<br>[illegible]<br>[illegible] | 12 से 19 अक्टूबर |
| 42 | उप निरीक्षक (दूरसंचार) | [illegible] | 09 नवम्बर |
| 43 | [illegible] | [illegible] | 22 से 23 नवम्बर |
| 44 | सहायक आचार्य - उच्च शिक्षा विभाग | [illegible] | 01 से 24 दिसम्बर |

सरकार के प्रथम वर्ष में लगभग 47,000 नियुक्तियां प्रदत्त

12 जनवरी को लगभग 13,500 और नियुक्ति पत्र वितरण


15,000 नियुक्तियों हेतु परीक्षा आयोजित, परिणाम शीघ्र

**निभाई जिम्मेदारी - हर घर खुशहाली**

सूचना एवं जनसम्पर्क विभाग, राजस्थान

प्रेषण-प्रत्येक माह की ५ तारीख आर.एम.एस. ( पी.एस.ओ. ) जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2024-26




स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः प्रोफेसर बनवारीलालगौडः, प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाषः ०१४१-२३७१०१४

प्रतिष्ठायाम्,